# शुद्धशाङ्करप्रक्रियाभास्करः

## ३-४-५

परिपोषिका -

श्री गुरुभक्तिपरायणा लक्ष्मीबायी गडकर,

सूर्यकिरण, मुंबयी.

अध्यात्मप्रकाशकार्यालयः,

होळेनरसीपुरम्.

Gentle Reader,

The present series of booklets, consists of a graduated course of Vedantic study in easy instalments that rouse and sustain the curiosity of the inquirer to know more and more of Shankara's system.

From the first instalment you have learnt that (1) up to the time of Shankara, Advaita was the only system universally supposed to be taught in the Upanishads, and that (2) Shankara's own interpretation is based on a hoary tradition that prevailed side by side with other different ways of presenting Upanishadic thought.

This second instalment is intended to place before you (1) the *essential doctrines* peculiar to Shankara's school, (2) the outlines of the *Unique Method of Vedanta* recognized by that school, and (3) the *principal sub-varieties of the Method* as found in the Upanishads, the Brahma-sutras, and the Bhagavadgita.

Each brochure in the series is purposely priced as low as possible, and free distribution of a limited number of copies among qualified sannyasins and pandits at the discretion of the Karyalaya is also under contemplation. Our heart-felt thanks are due to **Sri Gurubhaktiparayane Lakshmi Bai Gadakar, SuryaKirana, Bombay**, for having financed the publication of the second instalment.

Holenarsipur
24-7-1964.

*Y. NARASAPPA,*
*Chairman of the Working Committee*
*Adhyatma Prakasha Karyalaya.*

अध्यात्मग्रन्थावलिः

शुद्धशाङ्करप्रक्रियाभास्करः

तत्र

# ३. शाङ्करवेदान्तमर्यादा

# ४. शाङ्करवेदान्तप्रक्रियास्वरूपम्

# ५. अध्यारोपापवादप्रक्रियाविशेषाः

रचयितारः

श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

क्रमाङ्कः १२५

प्रकाशनस्थानम्

अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.

(हासनजिल्ला, मैसूरुप्रान्तः, दक्षिणरेल्वे.)

१९६४

First Printed 1964
1000 Copies

All rights reserved
by
The Adhyatma Prakasha Karyalaya
Holenarsipur

(Apply to the Chairman for permission to translate)

*Registered under the Copy Right Act, 1957*

Printed in India
by
Y. Narasappa
at
The Adhyatma Prakasha Press
Holenarsipur

# वेदान्तरसिकेषु विज्ञप्तिः

अयि महाभागाः, आवेदितमेव प्रथमभागविज्ञप्तौ यथा परस्परविरुद्धप्रस्थानसङ्करदूषितायां अद्यतनशाङ्करवेदान्तपठनपाठनपद्धतौ परिष्कारस्यावश्यकता अस्ति । यस्याः यथाशक्तिपरिहाराय मया शुद्धशाङ्करप्रक्रियाभास्कराभिख्यः प्रकृतग्रन्थो भागशः प्रकाशयितुम् आरब्धः । तत्र किरणद्वयात्मके प्रथमे भागे प्रतिपादितम् लब्धप्रचाराणामप्यद्वैतप्रस्थानभेदानां साम्प्रदायिकवेदान्तप्रक्रियानभिज्ञतया जिज्ञासुजनमनःपरितोषणासामर्थ्यम् आकलय्य भगवत्पादैः प्रस्थानत्रयभाष्याणि विरचितानि अनादिसम्प्रदायागतप्रक्रियाविशेषमाविष्कृत्य मुमुक्षून् कृतार्थयितुमिति । अथायं द्वितीयो भाग उपस्थाप्यते भवतां पुरतः किरणत्रयात्मकः, यदवलोकनेन निःसंशयं विज्ञायेत यदसाधारणप्रक्रियाविशेषादरणेनैव शाङ्करप्रस्थानं अर्वाक्तनेभ्यः सर्वेभ्यो विशिष्यत इति ॥

अत्र च शाङ्करवेदान्तमर्यादा, प्रस्थानेऽस्मिन् समाश्रीयमाणायाः प्रक्रियायाः सतत्त्वम्, सर्वास्वपि उपनिषत्सु भिन्नभिन्नत्वेनाभासमानानां च प्रक्रियाणाम् अस्या एवैकस्या अवान्तरभेदत्वं च – इत्येते विषया यथा पाठकहृदयमागच्छेयुः, तथा प्रतिपादने यत्नः कृतः ॥

प्रथमभागे इव, अत्रापि प्रमादसञ्जाता अक्षराङ्कनदोषाः, भाषादोषाः, विचारसरणिदोषाश्च अवश्यं स्युः । तानाविष्कृत्योपदर्शयितुं संप्रार्थ्यन्ते दोषज्ञाः, येनाहम् आधमर्ण्यप्रकटनपुरःसरं सर्वांस्तान् दोषान् दूरीकर्तुं प्रयतेयेति ॥

अस्य च मुद्रापणप्रकाशनविक्रयादिसर्वव्यवहारे अधिकारं होळेनरसीपुरस्थायै अध्यात्मप्रकाशकार्यालयकार्यकारिसमित्यै प्रत्तवानस्मि यथापूर्वं नारायणस्मरणपूर्वकमिति

श्रीशङ्करचरणस्मरणावलम्बी

ग्रन्थकर्ता

———

# सङ्केताक्षरविवरणम्

अत्र उपनिषदः तत्तन्नामाद्याक्षरेण सङ्केतिताः । तद्भाष्यं च भा॰ इति ॥

| | |
|---|---|
| उप॰ सा॰ | उपदेशसाहस्र्याम् (पद्यभागे) |
| गी॰ भा॰ | भगवद्गीताशाङ्करभाष्ये |
| गौ॰ का॰, का॰ | गौडपादीयकारिकासु |
| तै॰ ना॰ | तैत्तिरीयनारायणोपनिषदि |
| वे॰ सू॰ | बादरायणकृतवेदान्तसूत्रे |
| सू॰ भा॰ | ब्रह्मसूत्रशाङ्करभाष्ये |

॥ ॐ ॥

शुद्धशाङ्करप्रक्रियाभास्करः

# ३. शाङ्करवेदान्तमर्यादा

ओं नमो जगज्जन्मादिकारणाय

—:o:—

१४. **ब्रह्मात्मनः स्वयंसिद्धत्वम्** – शङ्करभगवत्पादेभ्यः प्रागपि प्रचलितानां विविधवेदान्तसंप्रदायानाम् अद्वैतमेव वेदान्तार्थत्वेन संप्रतिपन्नमभूत्, नासन्नेव वेदान्तिषु द्वैतविशिष्टाद्वैतादिमतप्रभेदा इत्यधिगतम् । शाङ्करप्रस्थानं तु अनादिसंप्रदायागतप्रक्रियाविशेषाभ्युपगमादेव तेभ्यो विलक्षणमिति च कतिचित्पूर्वाचार्यवाक्योदाहरणात् प्रसाधितम् । अथेदानीमेतत्संप्रदायविदां वचनैः प्रकटीकृता वेदान्तमर्यादाविशेषा विशिष्य प्रख्याप्यन्ते प्रस्थानान्तरवैलक्षण्यद्योतनार्थम् ॥

तत्र सर्वप्रथमनिरूपणमर्हति पूर्वकिरणोदाहृतं द्रविडाचार्यवाक्यम् –

(१) **'सिद्धं तु निवर्तकत्वात्'** इति । अस्यायमभिप्रायः – सर्वत्र श्रुतिषु ब्रह्मण्यात्मशब्दप्रयोगात, आत्मशब्दस्य च प्रत्यगात्मन्येव रूढत्वात् सर्वस्यात्मत्वेनैव ब्रह्म विवक्षितमिति गम्यते । आत्मनश्च स्वयंसिद्धत्वं सर्वैरप्यभ्युपेयम्, सर्वैरपि 'अहमस्मि' इत्येव प्रतीयमान_

त्वात्, 'नाहमस्मि' इति केनचिदपि प्रत्येतुमशक्यत्वाच्च । इत्थं च स्वयंसिद्धे ब्रह्मणि किमस्ति शास्त्रस्य कृत्यं येनास्य तत्र प्रामाण्यं स्यादिति ? अत्र द्रविडाचार्य आह – सत्यम्, सर्वस्यात्मत्वेन प्रतीयमानत्वाद् ब्रह्म स्वयंसिद्धमिति, तथापि सिद्धं तु प्रामाण्यं शास्त्रस्य आत्मविषये, तत्रात्मत्वेनाध्यारोपितानाम् अतद्धर्माणां निवर्तनेन आत्मवस्तुविशेषरूपसमर्पणात् – इति ॥

तत्र ब्रह्मण आत्मत्वेन नित्यापरोक्षतया स्वयंसिद्धत्वे श्रुतिः –

(अ) यत् साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः ॥

बृ. ३-४-१.

(आ) सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म ॥ मां. २.

इति च । तदेवं वेदान्तैकगम्यं स्वतःसिद्धमात्मतत्त्वमिति सांप्रदायिकीं प्रक्रियामवलम्ब्यैव भाष्यकारः पदे पदे स्वीयभाष्येषु लिखति स्म –

(1) न ह्यात्मा आगन्तुकः कस्यचित्, स्वयंसिद्धत्वात् ॥

सू. भा. २-३-७, पा. २६८.

(2) ननु आगमेन आत्मा परिच्छिद्यते प्रत्यक्षादिना च पूर्वम् । न । आत्मनः स्वतःसिद्धत्वात् ॥ गी. भा. २-१८, पा. १६.

(3) अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः ॥

सू. भा., अध्या. भा., पा. २.

(4) योऽसौ उपनिषत्स्वेवाधिगतः पुरुषोऽसंसारी ब्रह्म ...नासौ नास्ति नाधिगम्यत इति वा शक्यं वदितुम्, 'स एष नेति नेत्यात्मा'(बृ.) इत्यात्मशब्दात्, आत्मनश्च प्रत्याख्यातुमशक्यत्वात् ॥

सू. भा. १-१-४, पा. २०.

**१५. जीवस्य सद्ब्रह्मात्मत्वात् अकर्तृत्वं स्वभावः –**

समन्वयसूत्रभाष्यान्ते 'अपि चाहुः' (सू. भा., पा. २४) इत्यवतारितं

श्लोकत्रयं भगवत्पादसंमतमद्वैतसिद्धान्तसारं संगृह्णाति । तत्र प्रथमश्लोकोऽयम्

(२) गौणमिथ्यात्मनोऽसत्त्वे पुत्रदेहादिबाधनात् ।
सद्ब्रह्मात्माहमित्येवं बोधे कार्यं कथं भवेत् ॥

इति ॥

अत्र स्वयंसिद्धस्यात्मनः स्वभावत एवाकर्तृत्वम् इति वेदान्तमर्यादा स्फुटिता । अयमत्र श्लोकाभिप्रायः । पुत्रादिषु सकलेषु विकलेषु वा 'अहमेव सकलो विकलो वा' इति पुत्रादिधर्मान् आत्मन्यध्यस्यति अतिप्राकृतः । तत्र पुत्रादीनां स्वात्मनः सकाशाद् भेदस्य प्रसिद्धत्वात् ते **गौणात्मान** इति व्यपदिश्यन्ते । मुख्यात्मा तु स्वयम् इति जानन्नेव हि ततः पुत्रादिभेदं तेष्वात्मीयाभिमानौत्कट्यात् तद्धर्मानात्मन्यध्यारोपयति । देहादयस्तु – देहेन्द्रियमनांसि, अहङ्कारश्च – न तथा विविक्ता विज्ञायन्ते । 'अयं देहः, एष तु तद्विविक्तो ममात्मा' इत्येवं विवेकाभावादेव हि तत्र 'अहम्' इति निरुपचारेण मिथ्याप्रत्ययो वर्तते । अतो देहो मिथ्यात्मा, एवं इन्द्रियादिष्वपि मन्तव्यम् । तदेवं देहादयो **मिथ्यात्मान** इति व्यपदिश्यन्ते 'अहं स्थूलः', 'अहं पश्यामि', 'शृणोमि', 'विजानामि', 'दुःख्यामि', 'अहं देहादिस्वामी'– इति निरुपचारेण तत्राहंबुद्धेर्जायमानत्वात् । तत्रैवं स्थिते 'तत्त्वमसि' इति शास्त्राचार्योपदेशेन 'एकमेवाद्वितीयं सद्ब्रह्माहम्' इति बोधे जाते, 'अहं देवदत्तः, अयं विष्णुमित्रो मम पुत्रः' – इत्यादिरूपा मिथ्याबुद्धिर्बाधिता भवति । तदानीं देहादिषु, तत्संबन्धेषु वा असत्त्वेन ज्ञातेषु आत्मबुद्धेरभावात्, 'अहमेतत् कृत्वा मदर्थं पुत्राद्यर्थं वा इदं

कर्म कृत्वा तत्फलं प्राप्स्ये' इति सङ्कल्पो नैव जायते। देहादिसमवेत-कर्मणां आत्मन्यध्यारोपाभावात्। अतः सद्ब्रह्मात्मबोधे सति न कार्यम् अवशिष्यते – इति॥

अत्र च 'बोधे कार्यं कथं भवेत्' इति वचनात् अनवबोधादेव जनाः सक्रियात्मस्वरूपे अवतिष्ठन्ते, वस्तुतस्तु सर्वेषामप्यात्मा निष्क्रिय एव स्वभावतः इत्युक्तं भवति॥

तत्राविद्यात एव क्रियाकारकफलव्यवहारः, अद्वितीयात्मावबोधे तु न कार्यं संभवतीत्यत्र श्रुतिः –

(अ) यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति॥
तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव॥ बृ. ४-४-७.

[अविद्यया पूर्वं सशरीरोऽपि ब्रह्मात्मबोधानन्तरम् अशरीर इति शरीरात्मबाध उक्तोऽत्र॥]

(आ) आत्मानं चेद् विजानीयादयमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत्॥ बृ. ४-४-१२.

[अत्रात्मावबोधे सति कामयितव्याभावः, पुत्राद्यात्मीयाभावश्च – इति कर्महेतुः कामो निषिध्यते। अर्थात् कर्मापि निषिद्धं भवति॥]

सैषा कर्तृत्वाभावबुद्धिः आत्मज्ञानफलभूता गुरुसंप्रदायवतामेव सुलभा – इत्यागममवलम्ब्यैव भाष्यकारो वक्ति –

(1) तस्मात्, 'अहं ब्रह्मास्मि' इत्येतदवसाना एव सर्वे विधयः॥
सू. भा. १-१-४, पा. २३.

(२) आत्मविदो निवृत्तमिथ्याज्ञानत्वात्. विपर्ययज्ञानकृतस्य कर्मयोगस्य असंभवः स्यात् ॥ गी. भा. ५-१, पा. ८४

(३) पूर्वसिद्धकर्तृत्वभोक्तृत्वविपरीतं हि 'त्रिष्वपि कालेषु अकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि । नेतः पूर्वमपि कर्ता भोक्ता वा अहमासम्, नेदानीं, नापि भविष्यत्काले' इति ब्रह्मविदवगच्छति ॥

सू. भा. ४-१-१३. पा. ४७३.

## १६. ब्रह्मत्वमेव जीवस्य स्वभावो न प्रमातृत्वम् –

यथैव कर्तृत्वबुद्धिरज्ञानकृता, अकर्तृत्वमेव तु सर्वेषां नः स्वभावः, एवमेव 'ज्ञाताहम्, ब्रह्मज्ञानेनाज्ञानं परिहृत्य ब्रह्मात्मभावं प्राप्स्ये' इति बुद्धिरप्यज्ञानकृतैव । ब्रह्मात्मविज्ञानिनां तु 'ज्ञातृत्वादिविभागरहितं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मैवाहम्' इत्येव विनिश्चयः – इतीदं समन्वयसूत्रभाष्यान्ते समुदाहृतेन द्वितीयश्लोकेनोपदिश्यते -

(२) अन्वेष्टव्यात्मविज्ञानात् प्राक् प्रमातृत्वमात्मनः ।
अन्विष्टः स्यात् प्रमातैव पाप्मदोषादिवर्जितः ॥

यथैव 'सद्ब्रह्माहम्' इति प्रथमश्लोके छान्दोग्यश्रुतिः 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' (छां. ६-२-१) इतीयं परामृष्टा, एवमेव 'य आत्मा अपहतपाप्मा' (छां. ८-७-१) इतीयमिह सूचिता । एवं हि छान्दोग्यश्रुतिः –

(अ) य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच ॥ छां. ८-७-१.

(आ) तद्धोभये देवासुरा अनुबुबुधिरे ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानितीन्द्रो हैव देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः ॥ छां. ८-७-२.

इति । अत्र 'सोऽन्वेष्टव्यः' इति प्रजापतिवचनात्, 'तमात्मानमन्विच्छामः' इति देवासुरवचनाच्च, अन्वेष्टव्यः परमात्मा अन्वेष्टुरन्यः इति प्रतीयते । 'अनुविद्य विजानाति' इति स्वसंवेद्यतापादनस्य कर्तव्यत्वोपदेशाच्च ज्ञातुरात्मैवात्रोपदिष्ट इति च । अतः कतरदत्र न्याय्यमिति विचारणीयम् । प्रकरणपर्यालोचनया तु अत्र अन्वेषणविजिज्ञासने दृष्टार्थत्वेनैवोपदिष्टे इति गम्यते । तथा हि – 'य एषोऽक्षिणि पुरुषो दृश्यते' (छां. ८–७–४), 'उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतम्' (८–८–१), 'य एष स्वप्ने महीयमानश्चरत्येष आत्मा' (छां. ८–१०–१), 'तद्यत्रैतत् सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मा' (छां. ८–११–१) – इति च तमेवैकमिन्द्रस्यात्मानं प्रसिद्धं प्रजापतिरुपदिदेश, इन्द्रोऽपि तत्र तत्र दोषं पश्यन् 'नाहमत्र भोग्यं पश्यामि' इत्युवाच । 'एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुषः' (छां. ८–१२–३) इत्यवस्थात्रयकलुषपरिहारेणोक्तः स एव परमात्मा ऽन्विष्टः, इन्द्रस्य स्वरूपभूतत्वेन च विज्ञातः – इति प्रकरणसमालोचनेन य एव शरीरादिभिर्युक्तः प्रमाता इत्यभिमत आसीत्, तमेव उपदेशजन्यज्ञानादूर्ध्वं परमात्मानम् अपहतपाप्मादिगुणकं स्वात्मत्वेन प्रतिपन्न इन्द्रः–इत्यवगम्यते । तस्मात्

प्रागन्वेषणाद् विभावितं प्रमातृत्वमज्ञानतः, अन्विष्टस्य तु विज्ञातं पाप्मादिदोषवर्जितं स्वभावभूतम्–इति श्लोकार्थसारः ॥

तमेतं सम्प्रदायमनुसरन् भाष्यकारोऽपि 'भेदव्यपदेशाच्च' (ब्र. सू. १–१–१७) इति सूत्रस्य भाष्ये लिखति स्म –

(१) 'कथं तर्हि आत्मान्वेष्टव्यः', 'आत्मलाभान्न परं विद्यते' इति श्रुतिस्मृती ? यावता न लब्धैव लब्धव्यो भवतीत्युक्तम् । बाढम् । तथापि, आत्मनोऽप्रच्युतात्मभावस्यैव सतः, तत्त्वानवबोधनिमित्तो देहादिष्वनात्मसु आत्मत्वनिश्चयो लौकिको दृष्टः । तेन देहादिभूतस्यात्मनोऽपि आत्मा अनन्विष्टोऽन्वेष्टव्यः, अलब्धो लब्धव्यः, अश्रुतः श्रोतव्यः, अमतो मन्तव्यः, अविज्ञातो विज्ञातव्यः – इत्यादिभेदव्यपदेश उपपद्यते । प्रतिषिध्यत एव तु परमार्थतः सर्वज्ञात् परमेश्वराद् अन्यो द्रष्टा श्रोता वा 'नान्योऽतोऽस्ति द्रष्टा' (बृ. ३–७–२३) इत्यादिना । परमेश्वरस्तु अविद्याकल्पितात् शारीरात् कर्तुर्भोक्तुर्विज्ञानात्माख्यादन्यः । यथा मायाविनश्चर्मखड्गधरात् सूत्रेणाकाशमधिरोहतः स एव मायावी परमार्थरूपो भूमिष्ठोऽन्यः । यथा वा घटाकाशात्, उपाधिपरिच्छिन्नात् अनुपाधिरपरिच्छिन्न आकाशोऽन्यः । ईदृशं च विज्ञानात्मपरमात्मभेदमाश्रित्य 'नेतरोऽनुपपत्तेः', 'भेदव्यपदेशाच्च' इत्युक्तम् ॥ सू. भा. १–१–१७, पा. ३९.

[यद्यपि यथोदाहृतभागो वृत्तिकाराणाम् आनन्दमयस्यैव परमात्मत्वनिरूपणपरः, तथापि तेऽपि निर्विशेषात्मवादिनः, भगवत्पादसंप्रदायानुगता एव इति भाति । भगवत्पादैरप्येतादृशप्रक्रियाया एव समादरणादन्यत्र इति बोध्यम् ॥ ]

अत एव प्रमातृत्वमप्याविद्यकम्, अन्त्यप्रमाणभूतेन शास्त्रेण निवर्त्यत्वात् – इति लिखति स्म भाष्यकारः –

(३) प्रमातृत्वं हि आत्मनो निवर्तयत्यन्त्यं प्रमाणम् ॥
गी. भा. २-६९, पा. ३९.

[ शास्त्रस्य अन्त्यप्रमाणत्वं तु अग्रे उपपादयिष्यते ॥ ]

१७. आत्मज्ञानात् प्रागेव प्रमाणानां प्रमाणत्वम् – परमात्मज्ञानसमसमयमेव प्रमातृत्वमात्मनोऽपगच्छतीत्यनयैवोक्त्या तथैव प्रमाणानां प्रमाणत्वमपि बाधितं भवतीत्युक्तं भवति । तदेतत् समन्वय-सूत्रव्याख्यानान्ते भाष्यकारोदाहृतेन तृतीयश्लोकेन स्फुटीकृतम् –

(४) देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात् ॥

श्लोकाभिप्रायस्तु – यथा देहात्मप्रत्ययः, देहव्यतिरिक्तात्मज्ञानपर्यन्तं प्रमाणत्वेन कल्प्यते प्राकृतैर्जनैः, शास्त्रोपदेशाच्च देहातिरिक्तात्मास्तित्वं धर्माधर्मास्तित्वं, तत्कृतजन्मान्तरसंबन्धः, इष्टानिष्टफलोपभोगश्च–इत्येतत्सर्वं प्रमाणीक्रियते आस्तिकैः, तेन च शास्त्रजन्यज्ञानेन देहात्मबुद्धि-र्बाध्यते, एवमेव देहेन्द्रियमनोधर्मैरात्मनः प्रमातृत्वं तदाश्रितानां प्रमाणानां प्रमाणत्वं च सत्यमेवेति दृढं विश्वस्यते परमार्थज्ञानरहितैः ; यदा तु शास्त्राचार्योपदेशजन्याद् विज्ञानात् अद्वितीयात्मैव ममात्मा इति निश्चयो जायते, तदा तादृशनिश्चयसमसमयमेव प्रमातृत्वं बाध्यते । तदाश्रित-प्रमाणानां प्रमाणत्वमपीति ॥

अस्मिन्नर्थे श्रुतिरपि भवति –

(अ) यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं रसयते तदितर इतरमभिवदति तदितर इतरं शृणोति तदितर इतरं मनुते तदितर इतरं स्पृशति तदितर इतरं विजानाति

**यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कं रसयेत्तत्केन कमभिवदेत् तत्केन कं शृणुयात्तत्केन कं मन्वीत तत्केन कं स्पृशेत्तत्केन कं विजानीयात् ॥ बृ. ४–५–१५.**

इति । यत्राविद्यावस्थायां द्वैतमिव वस्त्वन्तरमात्मन उपलक्ष्यते, तत्र इतरो द्रष्टा इतरेण चक्षुषा इतरं दृश्यं पश्यति । एवमितरं जिघ्रति, रसयते, अभिवदति, शृणोति, मनुते, स्पृशति, विजानातीत्येवं प्रमाता प्रमाणेन प्रमेयं परिच्छिनत्तीति युज्यते । यत्र पुनर्ब्रह्मविद्यया अस्य ज्ञानिनः सर्वमात्मन्येव प्रविलापितम्, आत्मैव संवृत्तम्, तत्र कः प्रमाता केन प्रमाणेन किं प्रमेयं प्रमिमीत ? – इत्यविद्यावस्थायामेव प्रमाणानां प्रमाणत्वम्, विद्यावस्थायां द्वैतविषयप्रत्यक्षाद्यभावं च दर्शयतीयं श्रुतिः –

तामेतां वेदान्तमर्यादाम् अवलम्ब्यैव शङ्करभगवत्पादाः प्राहुः –

**(1) तमेतम् एवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते । तद्विवेकेन च वस्तुस्वरूपावधारणं विद्याम् आहुः । तत्रैवं सति यत्र यदध्यासः, तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न संबध्यते ॥ सू. भा., पा. २.**

[पण्डिताः ब्रह्मविदः, 'दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता' (का. १–२–४) इत्यादिश्रुत्यर्थमनुसंदधानाः । वस्तुस्वरूपावधारणमेव विद्या, अध्यस्तगुणदोषाभ्यां तदास्पदं वस्तु न संबध्यते – इत्युक्त्या प्रमातृत्वकर्तृत्वादिकमध्यारोपितमेवेति नात्मवस्तुसंस्पर्शि, नित्यासंसार्यद्वैतात्मरूपमेवास्य स्वभावः – इति स्फोरितं भवति ॥ ]

**(2) तमेतमविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः ॥ सू. भा., पा. २.**

[ ' वैदिकाश्च ' इत्यनेन ' सोऽन्वेष्टव्यः ' इत्यादिव्यवहारा अपि उपदेशार्थम् अविद्यां पुरस्कृत्यैव प्रवृत्ताः, नित्यान्विष्ट एवात्मा, स्वतःसिद्धत्वात् – इत्युक्तं भवति ॥ ]

(3) **कथं पुनः, अविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ? उच्यते । देहेन्द्रियादिषु अहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ, प्रमाणप्रवृत्त्यनुपपत्तेः ॥** सू. भा., पा. २.

[ देहेन्द्रियमनस्सु अहंममाभिमानकृतमेव प्रमातृत्वम्, कर्तृत्वादिकं च । एवं पुत्रभार्यादिषु गौणात्मस्वपि ममाभिमानकृतैव तदर्थं कर्मसु प्रवृत्तिः । देहेन्द्रियादिभ्यो विविक्तमात्मानं पश्यतस्तु न प्रमातृत्वम्, प्रमाणप्रवर्तकत्वं वा । प्रमात्राश्रयेणैव लब्धप्राणानां प्रमाणानामपि प्रमात्रभावे प्रमाणत्वानुपपत्तेः । – इत्युक्तं भवति । स्फुटतरं भवतीदं समनन्तरोत्तरोदाहरणेन ॥ ]

(4) **तस्मात्, 'अहं ब्रह्मास्मि' – इत्येतदवसाना एव सर्वे विधयः, सर्वाणि चेतराणि प्रमाणानि । न हि अहेयानुपादेयाद्वैतात्मावगतौ निर्विषयाणि, अप्रमातृकाणि च, प्रमाणानि भवितुमर्हन्तीति ॥**

सू. भा. १-१-४, पा. २३.

[अत्र यथोदाहृतश्लोकत्रयार्थः सर्वोऽपि संगृह्योक्तः । आत्मत्वादेवात्मनः प्रमेयत्वाभावात्, अहेयत्वमनुपादेयत्वं च । 'यत्र त्वस्य सर्वमात्मैवाभूत्' इति श्रुत्यनुसारेण प्रमातृप्रमाणप्रमेयविभागस्य आत्मैकत्वावगमे सति रज्ज्ववगमे सर्पधारादिविकल्पानामिवात्यन्तम् अभावात्, न प्रमाता, न च प्रमेयाण्यवशिष्यन्ते । अत एव स्वाश्रयभूतप्रमात्रभावात्, स्वविषयभूतप्रमेयाभावाच्च, तदुभयनिरूपितस्वरूपाणां प्रमाणानां प्रमाणत्वमेव नावकल्पते – इत्यर्थः ॥ ]

(5) **नन्वेकत्वैकान्त्याभ्युपगमे नानात्वाभावात्, प्रत्यक्षादीनि लौकिकानि प्रमाणानि व्याहन्येरन्, निर्विषयत्वात्, स्थाण्वादिष्विव पुरुषादिज्ञानानि । तथा विधिप्रतिषेधशास्त्रमपि भेदापेक्षत्वात् तदभावे**

व्याहन्येत । मोक्षशास्त्रस्यापि शिष्यशासित्रादिभेदापेक्षत्वात् तदभावे व्याघातः स्यात् .... । अत्रोच्यते । नैष दोषः । सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः । स्वप्नव्यवहारस्येव प्राक् प्रबोधात् । यावद् हि न सत्यात्मैकत्वप्रतिपत्तिः, तावत् प्रमाणप्रमेय-फललक्षणेषु विकारेषु, अनृतत्वबुद्धिर्न कस्यचिदुत्पद्यते । विकारानेव तु 'अहम्', 'मम' – इति अविद्यया आत्मात्मीयेन भावेन सर्वो जन्तुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा । तस्मात्, प्राग् ब्रह्मात्मता-प्रतिबोधात्, उपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारः ॥

सू. भा. २-१-१४, पा. १९८.

[एतेन 'प्रमाणं त्वात्मनिश्चयात्' इति श्लोकभागो व्याख्यातः । श्लोके 'देहात्मप्रत्ययो यद्वत्' इति दृष्टान्तो, भाष्ये स्वप्नव्यवहारप्रदर्शनेन स्फुटतरः कृतः ; यद्यपि, अकर्तृत्वम्, अप्रमातृत्वम्, अद्वितीयत्वं च स्वभाव एवात्मनः, तथापि एतत्स्वाभाव्याज्ञानादेव तु कर्तृत्वादिकं तथात्वेनावभासते तत्काले, स्वप्नकाले इव मिथ्याभावाः–इति ॥ ]

१८. **शास्त्रस्यान्त्यप्रमाणत्वम्** – शास्त्राचार्योपदेशात् आत्मतत्त्वज्ञाने जाते प्रमाणादिव्यवहारो मिथ्यात्वेनावगम्यत इत्यधिगतम् । अथ यथैव द्वैतबुद्धिरद्वैतज्ञानेन बाध्यते, तथैवाद्वैतबुद्धिरपि किमिति शून्यबुद्ध्या न बाध्येत ? अद्वैतात्मबुद्धिरेव त्वन्त्या–इति को विस्रम्भः ? स्वप्नान्तर्गतस्वप्ने हि तात्कालिकी जाग्रद्बुद्धिरनुवर्तमाना स्वान्तर्भावकस्वप्नविषययैव निश्चितजाग्रद्बुद्ध्या बाध्यते, ततः पश्चात् सापि स्वप्नविषया जागरितबुद्धिः परमार्थजागरितविषयया बुद्ध्या बाध्यत इति सर्वेषां नः प्रत्यक्षमेतदिति । अत्र संप्रदायविदां गौडपादाचार्याणां प्रतिवचनमिदम् –

(५) विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ गौ. का. १–१८.

अयमत्र कारिकाभिप्रायः । विकल्पो हि नाम अविद्यया स्वाभाविक्या जायमानो लौकिकप्रत्ययः, यथा सूर्ये प्रादेशमात्रत्वबुद्धिः, ऊषरप्रदेशे सोदकत्वबुद्धिः, रज्जौ सर्पत्वबुद्धिः – इत्यादिः । स च विकल्पः, अविकल्पितवस्तुस्वभावावधारणेन विनिवर्तते, अवधारितसूर्यादिसतत्त्वानामिव प्रादेशमात्रत्वादिप्रत्ययः । एवं देहात्मबुद्धिः, आत्मनि संसारित्वबुद्धिः, सद्वैतत्वबुद्धिश्च स्वाभाविकाविद्यया कल्पितत्वात्, अद्वैतज्ञानेन विनिवर्तेत इति युक्तम् । शास्त्रादिविकल्पस्तु न तथा केनचित् अविद्यावत्पुरुषेण कल्पितः, परमार्थाद्वैततत्त्वज्ञापनाय तु उपदेशार्थं ब्रह्मवादिभिरुपायत्वेन कल्पितोऽयं विभागः । ज्ञाते त्वद्वैततत्त्वे यथा अज्ञकल्पितं द्वैतं बाध्यते 'नास्त्ययं वस्तुत'–इति, एवं शास्त्रशिष्यादिद्वैतमपि न विद्यत इति विज्ञायत एव । न च अद्वैतमित्ययमपि विकल्प इति किं न स्यादिति शङ्क्यम् । 'अद्वैतम्' इति सर्वद्वैतविकल्पप्रतिषेधेनानिराकरणीयवस्तुतत्त्वमात्रस्य निर्देशात् । न च वस्तुतत्त्वज्ञाने सति पुनरपि ज्ञातृज्ञानज्ञेयादिविभागोऽस्ति, येनाद्वैततत्त्वमपि किमिति न बाध्यं भवेदित्याशङ्क्येत । न च सर्वविधस्यापि द्वैतस्य बाधे वेदस्यापि बाधः स्यात् इति शङ्कनीयम् । इष्टत्वात् । अत एव हि वेदे 'अन्त्यं प्रमाणम्' इति वेदान्तिसंव्यवहारः । तस्य सर्वप्रमाणव्यवहारबाधेनात्मनोऽपि प्रामाण्यस्य बाधकत्वादिति ॥

तामेतां वेदान्तमर्यादामनुसृत्याह भगवान् भाष्यकारः –

(1) प्रत्यक्षाद्यभावे श्रुतेरप्यभावप्रसङ्गः—इति चेत् । न । इष्टत्वात् । 'अत्र पिताऽपिता भवति' (बृ. ४-३-२२) इत्युपक्रम्य 'वेदा अवेदाः' (४-३-२२) इति वचनात्, इष्यत एवास्माभिः श्रुतेरप्यभावः प्रबोधे ॥ सू. भा. ४-१-३, पा. ४६५.

[यद्यप्ययं वेदस्याभावः सुषुप्तिविषये पठ्यते, तथाप्येकत्वाविशेषात् प्रबोधेऽपि तथेति कृत्वा उदाहृतं वचनम् ॥ ]

(2) अपि चान्त्यमिदं प्रमाणम्, आत्मैकत्वस्य प्रतिपादकं नातः परं किञ्चिदाकाङ्क्ष्यमस्ति । यथा हि लोके 'यजेत' इत्युक्ते किम्? केन? कथम्? – इत्याकाङ्क्ष्यते, नैवं 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्युक्ते किञ्चिदन्यदाकाङ्क्ष्यमस्ति । सर्वात्मैकत्वविषयत्वा(द्?)वगतेः । ……… न चेयमवगतिरनर्थिका भ्रान्तिर्वा – इति शक्यं वक्तुम् । अविद्यानिवृत्तिफलदर्शनात्, बाधकज्ञानान्तराभावाच्च ॥

सू. भा. २-१-१४, पा. १९९.

[अद्वैतात्मावगतेरूर्ध्वं तद्यतिरिक्तं न किञ्चिदवशिष्यते येनाकाङ्क्षा स्यात्, ज्ञातृज्ञानविभागस्यैवाभावाद् बाधकज्ञानान्तराभावः – इत्यर्थः ॥ ]

(3) न हि, आत्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः संभवति । प्रमातृत्वं हि आत्मनो निवर्तयति अन्त्यं प्रमाणम् । निवर्तयदेव च अप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे ॥

गी. भा. २-६९, पा. ३९.

[अत्र शास्त्रस्यान्त्यप्रमाणत्वे हेतुरुक्तः । प्रमातृत्वमेव हि शास्त्रं निवर्तयतीति ; स्वस्य च प्रमाणत्वेनानवशेषे स एव हेतुत्वेनापदिष्टश्च ॥ ]

(4) न हि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति, किं तर्हि प्रत्यगात्मत्वेन अविषयतया प्रतिपादयत् अविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति ॥ सू. भा. १-१-४, पा. १६.

(5) शास्त्रं तु अन्त्यं प्रमाणम् अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रामाण्यमात्मनः प्रतिपद्यते । न त्वज्ञातार्थज्ञापकत्वेन ॥

गी. भा. २-१८, पा. १६.

[शास्त्रस्य प्रमाणत्वमपि प्रमातृत्वाद्यतद्धर्मनिवर्तकत्वेन, प्रमाणानां प्रमाणत्वनिवर्तनेन च– इति 'सिद्धं तु निवर्तकत्वात्' इति सांप्रदायिकोक्तिसूचनम् ॥]

१९. उपसंहारः – तदेवं सांप्रदायिकपूर्वाचार्यवाक्योदाहरणेनैव संग्रहेण प्रदर्शिताः शङ्करभगवत्पादमतेन कतिचिद् वेदान्तमर्यादाविशेषाः । स्वयंसिद्ध एवाद्वितीयात्मा निर्विकल्पः, अविद्यया तस्मिन् प्रमाणप्रमेयादिविभागव्यवहारविकल्पाः, क्रियाकारकफलविभागव्यवहारविकल्पाश्च भवन्ति । तामेवाविद्यां पुरस्कृत्य विधिप्रतिषेधमोक्षपराण्यपि शास्त्राणि प्रवृत्तानि । श्रुतिस्तु तदात्मतत्त्वं न विषयीकृत्य बोधयति, किं तु ज्ञातृज्ञेयज्ञानादिभेदापनयनमुखेनैव तत्र प्रमाणमित्युपचर्यते । शास्त्रादिविभागोऽपि प्रागेव आत्मज्ञानात् उपायत्वेन कल्प्यते, विज्ञाते तु तत्त्वे सोऽपि विभागो नैव विद्यते–इत्यावेदितम् । अथ ज्ञानाज्ञानविकल्पोऽपि अविद्याकल्पित एव, नास्ति तु परमार्थत इत्यर्थे भाष्यवचनमुदाहृत्य किरणमिममुपसंहरामः ॥

(१) कस्य पुनरयमप्रबोधः – इति चेत् । यस्त्वं पृच्छसि तस्य ते इति वदामः । नन्वहमीश्वर एवोक्तः श्रुत्या । यद्येवं प्रतिबुद्धोऽसि नास्ति कस्यचिदप्रबोधः । योऽपि दोषश्चोद्यते कैश्चित् – अविद्यया किलात्मनः सद्वितीयत्वात् अद्वैतानुपपत्तिरिति सोऽप्येतेन प्रत्युक्तः ॥

सू. भा. ४-१-३, पा. ४६५.

(२) अविद्या कस्य दृश्यते ? – इति प्रश्नो निरर्थकः । कथम् ? दृश्यते चेत् अविद्या तद्वन्तमपि पश्यसि । न च तद्वति उपलभ्यमाने 'सा कस्य ?' इति प्रश्नो युक्तः ॥ गी. भा. १३-२, पा. १९५.

[अद्वैततत्त्वं कथमुपपाद्यम् ? – इति पृच्छन् हि अद्वैतमजानन् अद्वैतेऽप्यस्ति उपपाद्योपपादकविभाग इति भ्रान्त्या पृच्छति । अतस्तस्य तद्दृष्ट्या अविद्या अस्त्येव, अविद्याविकल्पितं द्वैतमपि । यदा तु स आचार्यप्रबोधितो विजानाति 'अहमस्मि ब्रह्माद्वितीयम्, नित्यशुद्धम्' इति, तदानीं नैवास्ति प्रश्नस्यावकाशः – इत्यभिप्रायः । न हि परमार्थदृष्ट्या अविद्या वा, द्वैतं वा अभ्युपगम्यते, किं तु बोध्यशिष्यदृष्ट्यैवेत्याशयः ॥ ]

तदेवं भगवत्पादसंप्रदायसंमता वेदान्तोपगमाः, कया प्रक्रियया वेदान्तेषूपपाद्यन्त इतीदमस्मिन् किरणे सङ्क्षेपेणोक्तमेव विशिष्य विस्तरेण प्रतिपाद्यते समनन्तरोत्तरकिरणे–इति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरण-
परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्र-
सरस्वत्याख्येन भिक्षुणा प्रणीते शुद्धशाङ्करप्रक्रियाभास्कराभिधे प्रकरणे
शाङ्करवेदान्तमर्यादा नाम तृतीयः किरणः

# ४ शाङ्करवेदान्तप्रक्रियास्वरूपम्

—:o:—

२०. **प्रक्रियासारः** – एवं तावत् पूर्वाचार्याणां केषाञ्चिद् वचनैराविष्कृताः कतिचिद् वेदान्तमर्यादाः प्रदर्शिताः पूर्वस्मिन् किरणे, भगवत्पूज्यपादानुसृतसंप्रदायविशेषसंस्तवार्थम् । अथेदानीं तत्संप्रदायाभिमतवेदान्तप्रक्रियास्वरूपं निर्धारणीयम् । तत्र नित्यशुद्ध एवाद्वितीयात्मनि प्रमातृत्वादिलक्षणं द्वैतमविद्ययैवाध्यारोपितं देहेन्द्रियादिष्वहंममाभिमानलक्षणया इत्यतः तदपनयनेन वस्तुतत्त्वजिज्ञापयिषया वेदान्ताः प्रवृत्ताः ; स्वतःसिद्धात्मनि तु ते केवलमतद्धर्मनिवर्तकत्वात् प्रमाणमित्युपचर्यन्ते–इत्युक्तम् । तत्र कया प्रक्रियया ते आत्मन्यध्यारोपितान् अतद्धर्मान् निवर्तयन्तीति ? अत्रोदाहृतं गीताभाष्ये –

(१) तथा हि संप्रदायविदां वचनम् 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति ॥

अत्रायं प्रक्रियासारः – (१) शुद्धब्रह्मात्मवस्तुनः निर्विशेषत्वस्वाभाव्यं बोधयितुं स्थूलबुद्धिभिरध्यारोप्यमाणानां सर्वेषां विशेषाणां प्रतिषेध्यत्वेनैव निर्देशः क्रियते 'अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति कश्चन' (बृ. ३-८-८) इत्यादिभिः श्रुतिभिः । एवं सर्वधर्मप्रतिषेधात् शून्यमेव तत् स्यादित्याशङ्का मा भूदिति तस्यासत्त्वबुद्धिनिरासार्थम् उपाधिकृतं मिथ्याविशेषमपि

स्वप्नादिवत् परिकल्प्य समुपदेशः । तदनु जिज्ञासुप्रतिबोधनार्थमेवं परिकल्पितस्य वस्तुधर्मत्वमेवेति शङ्कानिरासार्थम् उपदेशपरिसमाप्तौ तस्याप्यपवादः – इति ॥

२१. निष्प्रपञ्चे प्रपञ्चकल्पनमुपदेशार्थमेव, न तु प्रपञ्चो वस्तुसन् – तत्र यदज्ञैर्विकल्प्यते विशेषः स्वे आत्मनि, यदपि श्रुतिभिः परिकल्प्यते उपदेशार्थम्, तदेतदुभयमपि उपायमात्रत्वेन वेदान्तिभिः परामृश्यते, न तु वस्तुसदिति कृत्वा । इत्थं च जिज्ञासूनां जिज्ञासुत्वम्, तेषामज्ञानम्, शास्त्राचार्योपदेशजनितज्ञानेन तन्नाशः, ततश्च सप्रपञ्चत्वनिवृत्तौ आत्मनो निष्प्रपञ्चत्वेनावस्थानम् – इत्येतत् सर्वमपि अपरमार्थमेव सत् उपदेशोपायत्वेन सिद्धवत् परिकल्प्यते । तदेतत् स्पष्टमभिहितं संप्रदायविद्भिः श्रीगौडपादाचार्यैः –

अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥ का. १-१५.
अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ का. १-१६.
प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ का. १-१७.
विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ का. १-१८.

इति । अत्र (१) स्वप्नजागरिते सिद्धवत्कृत्य तत्रान्यथाग्रहणलक्षणस्वप्नत्वम् अध्यारोपितम्, जाग्रत्स्वप्नसुषुप्तिलक्षणावस्थात्रयं सिद्धवत्कृत्य तिसृष्वपि परमार्थाज्ञानलक्षणनिद्रात्वमध्यारोपितम् । तत्र च जाग्र-

त्स्वप्नयोरन्यथाग्रहणलक्षणो विपर्यासविशेषः । अग्रहणलक्षणा निद्रा यद्यपि तत्रापि विद्यत एव, तथापि केवलनिद्राध्यारोपः सुषुप्तावेवेति स एवासाधारणो विपर्यासस्तत्र – इति द्वेधा राशीकरणमवस्थानाम् । एवं चाग्रहणलक्षणो विपर्यासः, अन्यथाग्रहणलक्षणो विपर्यासश्च यदा तत्त्वज्ञानेन बाध्येते तदा 'तुरीयोऽहम्' इति निश्चयो भवतीति प्रथमश्लोकार्थः ॥

तदेवं तत्त्वाज्ञानतत्त्वान्यथाज्ञानलक्षणौ विपर्यासौ उपदेशार्थं प्रकल्पितौ प्रथमश्लोकेन । अथ द्वितीयेन तावपवदति–अनादिमाययेति । श्लोकाभिप्रायस्तु – (२) अग्रहणलक्षणनिद्रा वा अन्यथाग्रहणलक्षणस्वप्नो वा नास्त्येवात्मनि वस्तुतः । तदुभयमपि स्वप्नवद् विकल्पितमेव । अनादिमाययैव निद्रास्वप्नौ यथोदितौ कल्पितौ तत्र । यथा सुप्तः प्राकृतजनः स्वप्ने आत्मन्यविद्यमानमेव विशेषं कल्पयति माययैव, एवं मृषैवायं जीवः स्वात्मनि अग्रहणान्यथाग्रहणे कल्पयति अनादिमायास्वापवशात् । यदा तु शास्त्राचार्योपदेशात् परमार्थतत्त्वं जानन्, एतस्मान्मायास्वप्नात् प्रतिबुध्यते, तदा 'नासीदस्ति भविष्यति वा, अग्रहणलक्षणा निद्रा अन्यथाग्रहणलक्षणः स्वप्नो वा मय्यजे नित्यनिरवस्थे अद्वैतात्मनि' इति तुरीयत्वं विनिश्चिनोतीति ॥

अत्र 'यदा प्रबुध्यते तदा अजमनिद्रम् अस्वप्नम् अद्वैतं बुध्यते' इत्यक्षरार्थं गृहीत्वा अजत्वादयो ये आत्मनो धर्माः, ते बोधादूर्ध्वं बुध्यन्ते–इति न भ्रमितव्यम् । जन्मनिद्रादयो नात्मधर्मा इति ज्ञापने हि तात्पर्यं वाक्यस्य, न तु मायास्वापादयः प्राग् वस्तुसन्तः प्रबोधेन निवर्त्यन्ते–इत्यत्रापि । वक्ष्यते हि –

(अ) जन्म मायोपमं तेषां सा च माया न विद्यते ॥ का० ४-५८.

इति । तस्मात्, माया वा, मायास्वापो वा, निवर्त्यजन्मनिद्रा-स्वप्नान्यथो वा, निवर्तकप्रबोधो वा नैव विद्यन्ते परमार्थदृष्ट्या, सर्वोऽप्ययेन उपदेशार्थं एव वादः – इति बोध्यम् । अत एवाजत्वादयोऽपि निषेध्यापेक्षयैव समुपदिश्यन्त इति बोध्यम् । यदपि वक्ष्यते –

(आ) अजः कल्पितसंवृत्या परमार्थेन नाप्यजः ॥ का० ४-७४

इति ॥

तृतीयश्लोकाभिप्रायस्त्वयम्–(३) नैवं मन्तव्यम् अन्यथाग्रहण-काले सप्रपञ्चः सन् जीवस्तत्त्वज्ञानादूर्ध्वं निष्प्रपञ्चो भविता – इति । कुतः ? वस्तुतः प्रपञ्चस्य मायामात्रत्वेन सर्वदाप्यभावात्, प्रपञ्चोप-शमत्वमेवास्य स्वभावः – इति ॥

अथ तुरीयश्लोकाभिप्रायः – (४) नैवेत्थमपि प्रत्येतव्यम् अन्यः शिष्यः, स्वान्येन शास्त्रेणाचार्येण च प्रतिबोधितः, स्वस्य निष्प्रपञ्चत्वं बुध्यत इति । यत्कारणम्, उपायमात्रमिदमुपदेशार्थं कल्पितं वेदान्तेषु शास्त्रं, शास्ता, शिष्यः, अज्ञानम्, प्रतिबोधश्चेति । ज्ञाते तु परमार्थ-तत्त्वे नैवास्ति शिष्यादिविकल्पोऽपि परमार्थत इति निश्चीयत इति ॥

२२. वेदान्तेष्वभ्युपगतोऽध्यारोपो न तत्प्रामाण्य-विहन्ता – यथोक्तरीत्या आत्मन्यनात्माध्यारोपो द्विविधो भवति, नैसर्गिकाविद्याकृतः, शास्त्रकृतश्चेति । तत्राविद्याकृतो लौकिकव्यवहारो मिथ्याभूतोऽपि सत्यत्वाभिनिवेशपूर्वक इति संसारानर्थहेतुः, शास्त्रकृतस्तु तत्त्वोपदेशार्थमनूद्यमानः संव्यवहारमात्रालम्बनो जिज्ञासुजनबुद्धि-वैशद्यार्थं भवतीति विवेकः । यथाहुः श्रीगौडपादाचार्याः –

(१) संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै ।
सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै ॥ ४-५७.

इति । अत्र संवृतिर्नाम संवरणम्, अविद्याविषयो लौकिको व्यवहारः । व्यवहारदृष्ट्या सर्वमिदं जायत एव, तेन अविद्याविषये व्यवहारे शाश्वतं नाम न किञ्चिदस्ति ; सद्भावेन तु परमार्थदृष्ट्या वीक्ष्यमाणं सर्वमप्यजात्मतत्त्वमेव, तेन न कस्याप्युच्छेदः—इत्यर्थः ॥

(२) योऽस्ति कल्पितसंवृत्या परमार्थेन नास्त्यसौ ।
परतन्त्राभिसंवृत्या स्यान्नास्ति परमार्थतः ॥ ४-७३.

अत्र **कल्पितसंवृतिर्नाम**[1] परमार्थप्रतिपत्त्युपायत्वेन शास्त्रेणाचार्येण वा अभ्युपगम्यमानो व्यवहारः । यथा सबाह्याभ्यन्तरो ह्यजः ' (मुं) इत्यादिस्थले अभ्युपगम्यमानः, बाह्यादिविशेषरहिते बाह्याभ्यन्तरत्वादिमत्त्वव्यवहारः । **परतन्त्राभिसंवृतिस्तु** साङ्ख्यकाणादाद्यभिमतप्रमाणप्रमेयसत्कार्यवादपरमाणुकारणवादादिव्यवहारः । तदेतदुभयमपि संव्यवहारमात्रालम्बनमिति तत्त्वबोधाभ्युपायमात्रम्—इति बोध्यम् ॥

---

1. अत्र यद्यपि माध्यमिकानामपि संवृतिः परमार्थश्चेति सत्यद्वयं मतम् । ' बुद्धेरगोचरस्तत्वं बुद्धिः संवृतिरुच्यते ॥ ' (बो. च.) ; ' व्यवहारमनाश्रित्य परमार्थो न देश्यते । परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥ ' (मा. का. १४, वृ. पा. १८९) इति संवृतिपरमार्थविभागः सौगतैर्य एव कल्प्यते, स एव गौडपादैरादृत इति प्रच्छन्नबौद्धा एव तत्संप्रदायानुसारिणः – इति यः केषाञ्चिदुद्गारः, स तु वेदान्तसौगतप्रक्रियावैलक्षण्यविवेकशून्यत्वकृत इत्युपेक्ष्यः । श्रीगौडपादानां संवृत्यादिसौगतपारिभाषिकशब्दानां स्वीकारे बीजं वेदान्तिसौगतप्रक्रिययोर्वैलक्षण्यं च **माण्डूक्यरहस्यविवृतौ** वितत्य दर्शितमिति तत एवाधिगन्तव्यम् । इहाप्युदर्के किरणान्तरे समालोच्यते वैलक्षण्यमितीहोपरम्यते ॥

तदेवं लौकिकव्यवहारो वैदिकव्यवहारश्चेत्युभावपि यद्यप्यविद्याभूमावेव, तथापि अध्यारोपापवादप्रक्रियायाम् वेदान्तैरङ्गीक्रियमाणोऽध्यारोपो न शास्त्रप्रामाण्यविहन्ता उपदेशार्थमेव केवलमनूद्यमानत्वात् इति गौडपादैः सुस्पष्टं दर्शितमेव शाङ्करभाष्येष्वनुसृियत इति न विमार्तव्यम् ॥

२३. **अध्यारोपापवादेनैव बोधने हेतुः** – स्वतःसिद्धस्यात्मनो विषयत्वाभावाद् दुर्बोधत्वमालक्ष्य विविधाध्यारोपं कुर्वन्ती श्रुतिः, अध्यारोपितोपायस्य मिथ्यात्वादग्राह्यत्वमेव ज्ञापयत्यपवादेन – इतीदमपि प्रक्रियारहस्यं संप्रदायविद्भिर्गौडपादैरुद्घोषितम् –

स एष नेतिनेतीति व्याख्यातं निह्नुते यतः ।
सर्वमग्राह्यभावेन हेतुनाजं प्रकाशते ॥ ३-२६.

यद्यदुपायत्वेन व्याख्यातं तत् सर्वम् अग्राह्यमिति हेतोरेव श्रुतिः 'स एष नेतिनेत्यात्मा' (बृ. ३-९-२६, ४-२-४, ४-४-२२, ४-५-१५) इति पदे पदे निह्नुते । अजमद्वयमात्मतत्त्वं तु ततः स्वयमेव प्रकाशत इति कारिकार्थः ॥

२४. **ब्रह्मणः परप्रतिषेधैकगम्यता प्रस्थानत्रयसंमता** – निर्विशेषत्वादविषयत्वाच्च ब्रह्म अध्यारोपितपरप्रतिषेधैकगम्यमिति बादरायणीयसूत्रेऽप्युक्तम्, उपनिषत्सु बोधितम्, गीतास्मृत्युपदिष्टं च – इति भाष्यकारेण प्रस्थानत्रयसंगानं प्रदर्शितम् ॥

(१) दर्शयति चाथो अपि स्मर्यते ॥ वे. सू. ३-२-१७.
(२) अत एव चोपमा सूर्यकादिवत् ॥ वे. सू. ३-२-१८.

इत्यत्र भाष्योदाहृतानि 'अथात आदेशो नेति नेति', 'अन्यदेव तद्विदितादथो अविदितादधि', 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह', 'उपशान्तोऽयमात्मा', 'न सत्तन्नासदुच्यते', 'सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसि', 'उपाधिना क्रियते भेदरूपः', 'एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' – इतीमानि वाक्यानि परिशीलनीयानि ॥

**२५. अध्यारोप्योपदेशः सर्वत्रापि तदन्यप्रतिषेधार्थः**– अध्यारोपापवादप्रक्रिया प्रकारास्त्वनन्ताः । तत्र कतिचिदेवावान्तरप्रक्रियाविशेषास्तत्तत्समाख्यया प्रसिद्धाः । तासु काश्चिदुत्तरस्मिन् किरणे समालोचयिष्यामः । ते तु प्रदर्शनार्था एवेति विज्ञापनार्थं तावत् कांश्चिदन्यानप्यध्यारोपप्रकारान् अन्तर्णीतान्यनिषेधार्थान् अत्रोदाहरिष्यामः । (१) प्रत्यस्तमितसर्वविशेषेऽपि सर्वगतसर्वात्मत्वेन नित्यप्राप्तेऽपि ब्रह्मणि आप्यत्वम् श्रुतिषु क्वचिदध्यारोप्यते, 'ब्रह्मविदाप्नोति परम्' (तै. २–१) इत्यादिषु । तदिदं ज्ञानातिरिक्तसाधनप्राप्यत्वनिराकरणायैव; 'आप्नोति स्वाराज्यम्' (तै. १–६) इत्यादिस्थले इव गतिपूर्वकप्राप्यत्वं त्विह न विवक्षितमिति ज्ञापनाय च । एवं क्वचिज्ज्ञेयत्वमध्यारोप्यते 'एतज्ज्ञेयं नित्यमेवात्मसंस्थम्' (श्वे. १–१२), 'नारायणं महाज्ञेयम्' (तै.ना. १३–२९), 'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' (छां. ६–१–३) इत्यादिस्थलेषु । तत्तु ज्ञानेनात्यन्तमज्ञाननाशः, ज्ञातव्यान्तराभावश्च – इति ज्ञापनार्थम् । क्वचित्तु ज्ञातृत्वाध्यारोपेण ज्ञेयत्वं निरस्यते; 'विज्ञातारमरे केन विजानीयात्'

(बृ. २-४-१४) इत्यादिस्थलेषु यथा । क्वचित्पुनः साक्षित्वमध्यारोप्यते ज्ञातृत्वस्याप्यपह्नवाय, 'साक्षी चेता केवलो निर्गुणश्च' (श्वे. ६-११) इत्यत्र यद्वत् । अन्यत्र स्वरूपमेव निर्दिश्यते 'नेति नेति' (बृ. २-३-६) इति साक्षित्वादेः सर्वस्यापि विशेषधर्मस्य निषेधार्थम् । एवं क्वचिद् वेदान्तवाक्यगम्यत्वमध्यारोप्यते प्रत्यक्षाद्यगम्यत्वबोधनाय, 'यथा वेदान्तविज्ञानसुनिश्चितार्थाः' (मुं. ३-२-६) इत्यादिस्थलेषु । क्वचित्तु मनोगम्यत्वमुच्यते इन्द्रियागोचरत्वं ज्ञापयितुम्, 'मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन' (बृ. ४-४-१९) इत्यादिवाक्येषु यथा । क्वचित्तु मनोवागगोचरत्वमेवोच्यते तद्व्यतिरिक्तानुभवमात्रगम्यत्वबोधनार्थम् 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति' (तै. २-९) इत्यादिस्थलेषु यथा । एवमन्यत्राप्यूह्यं सुधीभिः ॥

तत्रैकैकेनाध्यारोपेण एकैकस्यैव विकल्पस्य निरासो विवक्ष्यत इत्यपि न नियमः । तद्यथा – आत्मनि ज्ञेयत्वाध्यारोपेण न केवलं तदन्यस्याज्ञेयत्वम्, किं तु तज्ज्ञानेन सर्वज्ञत्वम्, अज्ञानस्यात्यन्तिकनाशश्च–इत्यपि गम्यते । आत्माज्ञानमेव द्वैतप्रतिभासहेतुः, आत्मज्ञाने सति पुनर्न ज्ञातृज्ञानज्ञेयविभागः – इत्याद्यपि ततो गम्यत एव । तदेवम् आत्मातिरिक्तमपि ज्ञेयमस्तीति विकल्पः, आत्मज्ञानेन तन्मात्रमेव ज्ञातं स्यादिति विकल्पः, तज्ज्ञाने सत्यपि पुनरप्यज्ञानं कदाचिद् प्रादुर्भवेदिति विकल्पः, द्वैतं विद्यमानमेव प्रतिभासत इति विकल्पः,

ज्ञातेऽप्यात्मनि ज्ञातृत्वमवशिष्यत एवेति विकल्पश्चेत्येवमाद्यनेकविकल्पनिवारणम् आत्मनि ज्ञेयत्वाध्यारोपाद् विवक्षितं भवति ॥

दिङ्मात्रमिह दर्शितं यथा कस्य कस्याध्यारोपेण किं किमपोद्यत इति ; सूक्ष्मबुद्धिभिरेवमेवोह्यम् अन्यत्राप्यध्यारोपस्थलेषु । इदं तु न प्रस्मर्तव्यं यत्, निर्धर्मके परमार्थतत्त्वे यत्र यत्र यद्यदारोपपूर्वकमुपदिश्यते तत्र तत्र केवलं तत्तदन्यप्रतिषेध एव प्राधान्येन विवक्ष्यते, न तु वस्तुनस्तत्तद्धर्मत्वमपि ; अन्यत्र तस्याध्यारोपितस्य कण्ठरवेण निषेधात् इति ॥

**२६. भाष्यवाक्योदाहरणानि** – अध्यारोपापवादप्रक्रियायामेव भगवतो भाष्यकारस्य परमादरः, परमार्थतत्त्वस्य निर्विशेषत्वात् केनचिद्विधिमुखेन तत्स्वरूपनिर्देशस्याशक्यत्वात् – इत्यत्र कतिचिद् वचनानि इदानीमुदाहरिष्यामः –

(१) गौरसौ, स्पन्दते, शुक्लो, विषाणी इति यथा लोके निर्दिश्यते तथा अध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते 'विज्ञानमानन्दं ब्रह्म', 'विज्ञानघन एव', 'ब्रह्म', 'आत्मा' – इत्येवमादिशब्दैः । यदा पुनः स्वरूपमेव निर्दिदिक्षितं भवति निरस्तसर्वोपाधिविशेषम्, तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुम् ; तदा अयमेवाभ्युपायो यदुत प्राप्तनिर्देशप्रतिषेधद्वारेण 'नेति नेति' इति निर्देशः ॥

बृ. भा. २-३-६. पा. ७५५-७५६.

(२) सर्वो हि शब्दः, अर्थप्रकाशनाय प्रयुक्तः श्रूयमाणश्च श्रोतृभिः जातिक्रियागुणसंबन्धद्वारेण सङ्केतग्रहणसव्यपेक्षोऽर्थं प्रत्याययति नान्यथा । अदृष्टत्वात् । तद्यथा 'गौः', 'अश्वः' – इति वा जातितः ; 'पचति', 'पठति' इति वा क्रियातः, 'शुक्लः', 'कृष्णः' इति वा गुणतः ;

'धनी', 'गोमान्' इति वा संबन्धतः । न तु ब्रह्म जातिमत्, अतो न सदादिशब्दवाच्यम्; नापि गुणवत्, येन गुणशब्देनोच्येत. निर्गुणत्वात् । नापि क्रियाशब्दवाच्यम्; निष्क्रियत्वात् । 'निष्कलं निष्क्रियं शान्तम्' (श्वे. ६-१९) इति श्रुतेः । न च संबन्धी; एकत्वात् । अद्वयत्वात्, अविषयत्वात्, आत्मत्वाच्च न केनचिच्छब्देनोच्यत इति युक्तम् 'यतो वाचो निवर्तन्ते' (तै. २-९) इत्यादिश्रुतिभ्यश्च ॥

गी. भा १३ १२. पा. २०३.

(३) नापि प्रमाणान्तरविषयत्वं स्वरूपेण गवादिवत्, आत्मनो निरुपाधिकत्वात्, गवादिवत् । नापि जातिमत्त्वम्, अद्वितीयत्वेन सामान्यविशेषाभावात् । नापि क्रियावत्त्वं पाचकादिवत्, अविक्रियत्वात् । नापि गुणवत्त्वं नीलादिवत्, निर्गुणत्वात् । अतो नाभिधानेन निर्देशमर्हति ॥ मां. भा. ७, पा. १८६.

(४) अविद्याध्यारोपितसुखित्वादिविशेषप्रतिबन्धादेव आत्मनः स्वरूपेणानवस्थानम् । स्वरूपावस्थानं च श्रेयः – इति सुखित्वादिनिवर्तकं शास्त्रम् आत्मन्यसुखित्वादिप्रत्ययकरणेन, नेतिनेत्यस्थूलादिवाक्यैः ॥

गौ. का. भा. २-३२, पा. २०५.

(५) तस्मादेव च न ज्ञानशब्दवाच्यमपि तद् ब्रह्म । तथापि तदाभासवाचकेन बुद्धिधर्मविषयेण ज्ञानशब्देन तल्लक्ष्यते, न तूच्यते । शब्दप्रवृत्तिहेतुजात्यादिधर्मरहितत्वात् । तथा सत्यशब्देनापि । सर्वविशेषप्रत्यस्तमितस्वरूपत्वाद् ब्रह्मणः । बाह्यसत्तासामान्यविषयेण सत्यशब्देन लक्ष्यते सत्यं ब्रह्मेति, न तु सत्यशब्दवाच्यमेव ब्रह्म ॥

तै. भा. २-१, पा. २८५.

[लक्ष्यते इत्यत्रापि न निर्भरः । न हि शब्दः केनापि वृत्त्या ब्रह्म विषयीकर्तुं शक्नुयात् । अविषयत्वात् । शब्दस्याप्यात्मत्वाच्च ब्रह्मणः । 'सत्यं ब्रह्म' इति ब्रह्म विकारान्निवर्तयति' इत्यन्यत्र (पा. २८३) स्पष्टीकृतमेतत् । एवं 'ज्ञानं ब्रह्म' इति घटादिस्वभावान्निवर्तयतीत्यपि बोध्यम् । 'कारणस्य

च कारकत्वं वस्तुत्वात मृद्वदचिद्रूपता च प्राप्ता । अत इदमुच्यते – ज्ञानं ब्रह्मेति ' इति (पा· २८३) भाष्यवचनात् ॥ ]

**(६) ननु आत्मापि आत्मशब्देनाभिधीयते । न । 'यतो वाचो निवर्तन्ते', 'यत्र नान्यत् पश्यति' इत्यादिश्रुतेः । कथं तर्हि 'आत्मैवाधस्तात्', 'स आत्मा' इत्यादिशब्दा आत्मानं प्रत्याययन्ति ? नैष दोषः । देहवति प्रत्यगात्मनि भेदविषये प्रयुज्यमानः शब्दो देहादीनामात्मत्वे प्रत्याख्यायमाने यत् परिशिष्टं सत् अवाच्यमपि प्रत्याययति ॥**

**छां· भा· ७–१–३, पा· ५४२·**

[अत्र, अभिधानाभिधेयभेदस्य विकारत्वात् विकारस्य चानात्मत्वात् न तद्विलक्षणस्य सर्वस्याप्यात्मभूतस्य शब्दाभिधेयत्वं ब्रह्मणः – इति कथनप्रसङ्गेनेदमुक्तम् । तथा च देहादिषु प्राप्तात्मबुद्धिनिवृत्त्यर्थमेवात्मनि आत्मशब्दप्रयोगः शब्दाविषयेऽपीत्यभिप्रायः ॥ ]

इत्येवं दर्शितं संग्रहेण शाङ्करवेदान्तप्रक्रियास्वरूपम् । अथ वेदान्तप्रक्रियाविशेषाः प्रदर्श्यन्ते सर्वत्र प्रधानप्रक्रियानुगमख्यापनार्थं समनन्तरोत्तरकिरणे इति शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीते शुद्धशाङ्करप्रक्रियाभास्कराभिधे प्रकरणे

**शाङ्करवेदान्तप्रक्रियास्वरूपम् नाम चतुर्थः किरणः**

# ५. अध्यारोपापवादप्रक्रियाविशेषाः

—:o:—

२७. **ग्रन्थसंबन्धः** – अवगमितमेतत् यत् सर्वेष्वपि वेदान्तेषु अद्वैतात्मतत्त्वसमर्पणाय अध्यारोपापवादप्रक्रियैवैका समादृतेति भगवत्पादीयं मतमिति । प्रतिपादितं च प्रक्रियास्वरूपं सामान्यतः, शाङ्करवेदान्ताभ्युपगमविशेषाः संप्रदायाध्वनि स्थिता इत्यत्र प्राचीनाचार्यवचनोदाहरणव्याजेन । अथास्या वेदान्तप्रक्रियाया विशेषाकारा यथा प्रस्थानत्रयभाष्येषु निर्दिष्टाः, तथा सङ्क्षेपेण प्रदर्शयिष्यामः ॥

२८. **विद्याविद्याविवेकप्रक्रिया** – तत्र 'ब्रह्मविदाप्नोति परम्' (तै. २–१), 'स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति' (मुं. ३–२–९), 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद ॥' (बृ. ४–४–२५) इत्यादिभिः श्रुतिभिः ब्रह्मविज्ञानमात्राद् ब्रह्मभावलक्षणपरमपुरुषार्थप्राप्तिज्ञापनात्, मुक्तिरविद्यामात्रव्यवहितेति गम्यते । तस्मात् विद्याविद्याविवेकप्रक्रिया सर्वप्रथमं समालोचयितव्या । तत्र इमानि भाष्यवाक्यानि अनुसन्धेयानि भवन्ति –

(१) यथा गृह्यमाणाया अपि शुक्तिकाया विपर्ययेण रजताभासायाः अग्रहणं विपरीतज्ञानव्यवधानमात्रम्, तथा ग्रहणं ज्ञानमात्रमेव ।

विपरीतज्ञानव्यवधानापोहार्थत्वात् ज्ञानस्य । एवम्, इहापि आत्मनोऽलाभोऽविद्यामात्रव्यवधानम् । तस्मात् विद्यया तदपोहनमात्रमेव लाभो नान्यः कदाचिदप्युपपद्यते ॥ बृ. भा. १-४-७, पा. ६६६.

(२) ब्रह्मैव हि मुक्त्यवस्था ॥ सू. भा. ३-४-५२, पा. ४५८.

[अत्रोक्तं ब्रह्मात्मभावः प्राप्त एवाविद्यया अप्राप्त इव, विद्यया प्राप्त इव च भवतीति ॥ ]

(३) युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद् विरुद्धस्वभावयोः, इतरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतराम् इतरेतरभावानुपपत्तिः – इत्यतः अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः,तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषये अध्यासो मिथ्या–इति भवितुं युक्तम्; तथापि अन्योन्यस्मिन् अन्योन्यात्मकताम् अन्योन्यधर्मांश्च अध्यस्येतरेतराविवेकेन अत्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्', 'ममेदम्'–इति नैसर्गिकोऽयं लोकव्यवहारः ॥

(३ अ) तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते । तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यां आहुः ॥

अध्यासभाष्यम्, पा. १-२.

[यया अविद्यया ब्रह्मात्मत्वं व्यवहितम्, तस्याः स्वरूपं स्फुटितम्, अविवेकनिमित्तेतरेतराध्यास एवाविद्येति । तद्विवेकेन आत्मानात्मनोः सत्यत्वेन, अनृतत्वेन च स्वरूपनिर्धारणमेव विद्या–इति चोक्तमत्र ॥ ]

तदेवम् विद्याविद्याध्यारोपेण बन्धस्य सत्यत्वम्, मुक्तेरागन्तुकत्वं च, प्रतिषिद्धम् । अथात्मनो विद्वत्त्वमपि अविद्वत्त्ववदेव समारोपितम् नात्मनः स्वभावः–इत्यत्र भाष्यम् –

(४) यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्य अविक्रिय एव सन् बुद्धिवृत्त्या अविवेकविज्ञानेन अविद्यया 'उपलब्धा' आत्मा कल्प्यते, एवमेव आत्मानात्मविवेकज्ञानेन बुद्धिवृत्त्या विद्यया असत्यरूपयैव परमार्थतोऽविक्रिय एवात्मा 'विद्वान्' उच्यते ॥ गी. भा. २-२१, पा. १९.

[बुद्धिवृत्त्युपाधिवशादेव विद्वत्त्वाविद्वत्त्वव्यवहारः-इत्युक्तं भवति ॥]

(५) विवेकाविवेकौ रूपादिवत् प्रत्यक्षौ उपलभ्येते अन्तःकरणस्थौ । न हि रूपस्य प्रत्यक्षस्य सतो द्रष्टृधर्मत्वम् । अविद्या च स्वानुभवेन रूप्यते, 'मूढोऽहम्; अविविक्तं मम विज्ञानम्' इति । तथा विद्याविवेकोऽनुभूयते । उपदिशन्ति चान्येभ्य आत्मनो विद्यां बुधाः । तथा चान्ये अवधारयन्ति । तस्मात् नामरूपपक्षस्यैव विद्याविद्ये; नामरूपे च नात्मधर्मौ ॥ तै. भा. २-८, पा. ३१०.

(६) तिमिरातिमिरदृष्टिवत् अविद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेषः स्यात् इति चेत् । न । 'ध्यायतीव लेलायतीव' इति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात् ॥ बृ. भा. ४-४-६, पा. ९१९.

[विद्याविद्ययोरनात्मधर्मत्वमेव, विषयत्वात् ; आत्मनस्तद्वत्त्वप्रतीतिस्त्वाभासमात्रम्-इत्युक्तमत्र ॥]

एवं चात्र विद्याविद्याप्रक्रियेयमात्मनि परतन्त्रसंवृत्त्या ज्ञातृत्वमध्यारोप्यैव, परमार्थतस्तु नैव ज्ञाताप्यात्मा इति –

योऽस्ति कल्पितसंवृत्त्या परमार्थेन नास्त्यसौ ।
परतन्त्राभिसंवृत्या स्यान्नास्ति परमार्थतः ॥ गौ. का. ४-७३.

इति संप्रदायानुगमादिति ज्ञेयम् ॥

२९. शास्त्रप्रामाण्यप्रक्रिया – 'एवं तन्त्वौपनिषदं पृच्छामि' (बृ. ३-९-२६), 'सर्वे वेदा यत्पदमामनन्ति' (का. १-२-१५)

इति च श्रुतेः, आत्मन उपनिषन्मात्रवेद्यत्वोक्तिः प्रत्यक्षादिप्रमाणान्तरागम्यत्वद्योतनायैव, न तु शब्दज्ञाप्यत्वमङ्गीकृत्य । यथाह भगवान् भाष्यकारः –

(१) वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता ॥ सू. भा. १-१-२, पा. ७.

(२) रूपाद्यभावाद् हि नायमर्थः प्रत्यक्षस्य गोचरः । लिङ्गाद्यभावाच्च नानुमानादीनाम् । आगममात्रसमधिगम्य एव त्वयमर्थो धर्मवत् ॥ सू. भा. २-१-६, पा. १८८.

आगममात्रसमधिगम्यत्वमेव त्वभिप्रेत्य सूत्रितं भगवता बादरायणेन 'शास्त्रयोनित्वात्' (वे. सू. १-१-३) इति ; भाषितं च भाष्यकारेण 'शास्त्रादेव प्रमाणात् जगतो जन्मादिकारणं ब्रह्माधिगम्यत – इत्यभिप्रायः' इति । न तु तावता प्रमाणप्रमेयव्यवहारः पारमार्थिक–इति, शास्त्रं च प्रत्यक्षादिप्रमाणवदेव प्रमाणादनधिगतं ब्रह्म ज्ञापयतीति वा भ्रमितव्यम् 'यद्वाचानभ्युदितं येन वागभ्युद्यते' (के. १-५) इत्यादिश्रुतेः । प्रमाणानां शास्त्राणां च, अविद्यापुरस्सरमेव प्रवृत्तेश्च । यदाह भाष्यकारः –

(१) शास्त्रं तु अन्त्यं प्रमाणम् अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रामाण्यमात्मनः प्रतिपद्यते, न त्वज्ञातार्थज्ञापकत्वेन ॥

गी. भा. २-१८, पा. १६.

[अतद्धर्मनिवर्तकत्वमात्रेण – इति भिन्नक्रमो मात्रशब्दः]

(२) प्रमातृत्वं हि आत्मनो निवर्तयति अन्त्यं प्रमाणम्, निवर्तयदेव च अप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे ॥

गी. भा. २-६९, पा. ३९.

[अविद्याकृतप्रमातारमाश्रित्यैव प्रमाणव्यवहारप्रवृत्तेः, श्रुतेरपि प्रमाणत्वमविद्यादृष्ट्यैवोपचर्यते–इति भावः ॥ ]

(३) **तमेतमविद्याख्यम् आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः लौकिका वैदिकाश्च प्रवृत्ताः । सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि ॥ अध्यासभाष्यम् , सू-भा-, पा- २-**

['सर्वे' इत्यविशेषवचनात् मुमुक्षुमुक्तव्यवहारा अपि अविद्यादृष्ट्यैवेत्युक्तं भवति । 'मोक्षपराणि' इत्यनेन आत्मविषयकमपि शास्त्रं सांवृतिकप्रमाणव्यवहारमाश्रित्यैव प्रवृत्तमित्युक्तं भवति ॥ ]

तदेवं वेदान्तिनां प्रमाणप्रमेयव्यवहारः, शास्त्रादिव्यवहारश्च तत्त्वोपदेशार्थम् अध्यारोपापवादप्रक्रियामाश्रित्यैवेति सिद्धम् ॥

३०. **सृष्टिप्रक्रिया** – वेदान्तेषु यथैव जीवब्रह्मणोर्भेदमुररीकृत्य, जीवे ज्ञातृत्वं ब्रह्मणि ज्ञेयत्वं चाध्यारोप्य, ब्रह्मजिज्ञासा कर्तव्यत्वेनोपदिश्यते, एवमेव जीवेश्वरभेदमुपजीव्य ब्रह्मणो जगज्जन्मादिकारणत्वम् , सृष्टे जगति जीवात्मना प्रवेशः, पुनरपि तस्मिन्नेव ब्रह्मणि तदप्ययश्च–इत्येतत् सर्वमुपदिश्यते । जीवस्य अवस्थाभेदाः, गत्यागती, जन्ममरणादिसंसारः ज्ञानावाप्त्या मोक्षश्च – इत्येते अपि तथैव । तदेतत् सर्वमध्यारोपापवादप्रक्रियामवलम्ब्य परमात्मतत्त्वं प्रतिबोधयितुमुपायत्वेनैव, न तु वस्तुतोऽपि ब्रह्मणः जगज्जन्मादिकारणत्वम्, सृष्टे जगति जीवरूपेण प्रवेशः, जीवानां बन्धमोक्षावाप्तिश्च तथ्यत एव – इति कृत्वा । तदेतत् **श्रीगौडपादाचार्यै**रेवं श्लोकेन संगृहीतम् –

**न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।**
**न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ २-३२-**

इति। तत्र जगत्सृष्टिमुपजीव्यैव जीवानां स्वरूपम् अवस्था गत्यागत्यादि-संसारबन्धः, ततो मोक्षः, मोक्षसाधनं च – इत्येतत्सर्वं विचारणीयमिति प्रप्रथमं सृष्टिप्रक्रिया विचार्यते ॥

सृष्टिश्रुतयस्तावत् आत्मैकत्वविद्याप्रतिपादनार्थमेव प्रवृत्ताः। न तु सृष्टौ तात्पर्यं तासाम् इत्येतत् तावत् तैत्तिरीयके 'ब्रह्मविदाप्नोति परम्' इति ब्रह्मविद्याफलकथनपूर्वकं 'आत्मन आकाशः संभूतः' (तै. २–१) इत्यादिना सृष्ट्यादिकमुक्त्वा 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति' (तै. २–७) इति सृष्टस्य मूर्तामूर्तलक्षणस्य सर्वस्यापि तस्मिन्नेव निर्विशेषे ब्रह्मणि निषेधाद् विनिश्चीयते। एवमेव मुण्डके 'यत्तदद्रेश्य-मग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्' (मुं. १–१–६) इति सर्वविशेषरहितमक्षरं प्रतिज्ञाय 'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते....' इत्यादिना तस्मादेवाक्षरात् जगतः सृष्टिमभिधाय 'पुरुष एवेदं विश्वम्' (मुं. २–१–१०) 'ब्रह्मैवेदममृतं पुरस्तात्' (मुं. २–२–११) इति चोपसंहारात्। 'एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य' (मुं. २–१–१०) इति च ब्रह्मज्ञानफलसङ्कीर्तनाच्च एतदेवमिति निश्चीयते। एवमेव सर्वेष्वपि वेदान्तेषु सृष्टिप्रक्रियाया अध्यारोपापवाद-प्रक्रियाभेदत्वं विज्ञापितं बोद्धव्यम् ॥

तदेतत् प्रस्थानत्रयेऽपि समानम्, आत्मैकत्वविज्ञापनार्थं जगत्सृष्टे रध्यारोपः, पुनस्तदपवादश्चेति। तद्यथा भगवद्गीतासु –

(1) प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ॥ गी. ९-८.

मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ गी. ९-४.

[ इत्यध्यारोपः ]

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥ गी. ९-५.

[ इत्यपवादः ]

## शारीरके च –

(2) कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः ॥ १-४-१४.

भाष्यम् – (अ) यथाभूतो ह्येकस्मिन् वेदान्ते सर्वज्ञः सर्वेश्वरः सर्वात्मा एकोऽद्वितीयः कारणत्वेन व्यपदिष्टः, तथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते । ........ 'बहु स्यां प्रजायेय' इति चात्मविषयेण बहुभवनानुशंसनेन सृज्यमानानां विकाराणां स्रष्टुरभेदमभाषत । तथा 'इदं सर्वमसृजत । यदिदं किञ्च' इति समस्तजगत्सृष्टिनिर्देशेन प्राक् सृष्टेरद्वितीयं स्रष्टारमाचष्टे । तदत्र यल्लक्षणं ब्रह्म कारणत्वेन विज्ञातम्, तल्लक्षणमेवान्यत्रापि विज्ञायते ॥ सू. भा. १-४-१४, पा. १६२, १६३.

(आ) भवेदपि कार्यस्य विगीतत्वम्, अप्रतिपाद्यत्वात्. न ह्ययं सृष्ट्यादिप्रपञ्चः प्रतिपिपादयिषितः । न हि तत्प्रतिबद्धः कश्चित् पुरुषार्थो दृश्यते श्रूयते वा । न च कल्पयितुं शक्यते ; उपक्रमोपसंहाराभ्यां तत्र तत्र ब्रह्मविषयैर्वाक्यैः साकमेकवाक्यताया गम्यमानत्वात् । ........ मृदादिदृष्टान्तैश्च कार्यस्य कारणेनाभेदं वदितुं सृष्ट्यादिप्रपञ्चः श्राव्यत इति गम्यते । तथा च संप्रदायविदो वदन्ति –

'मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा ।
उपायः सोऽवताराय नास्ति भेदः कथञ्चन ॥' इति ॥

सू. भा. १-४-१४, पा. १६३

इति ॥

३१. **कार्यकारणप्रक्रिया** – एतेन कार्यकारणप्रक्रिया व्याख्याता । तथा हि श्रुतिः 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति ॥' (मुं. २–१–१) इत्याद्या जीवानां ब्रह्मण उत्पत्तिं ब्रह्मण्येव च लयं श्रावयति ; 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' (मुं. २–१–३) इति च आध्यात्मिकादिलौकिकभावानां सर्वेषामप्युत्पत्तिर्ब्रह्मण एवेति श्रावयति । तथा 'तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत' (छां. ६–२–३) इत्याद्या च ब्रह्मण एव तेजआदिरूपेणोत्पत्तिं श्रावयति–इत्यतो ब्रह्मजगतोः कार्यकारणभाव एव विवक्ष्यत इति तावद् भाति । परं तु कार्यस्य कारणानन्यत्वं वक्तुमेवेयं कार्यकारणप्रक्रिया शिष्टा इति तस्यैव कार्यकारणभावस्यापवादाद्दवगम्यते । 'अजायमानो बहुधा विजायते' (तै. आ. ३-१३ १०.), मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥' (श्वे. ४–१०) इत्यादिश्रुतिभ्यः ॥

तदेतत् सूत्रकारोऽप्यसुसूचत् –

(१) तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ वे. सू. २-१-१४.

भाष्यकारश्चैवं सूत्रार्थं व्याकृतवान् –

(२) कार्यमाकाशादिकं बहुप्रपञ्चं जगत्, कारणं परं ब्रह्म । तस्मात् कारणात् परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः, कार्यस्यावगम्यते । कुतः ? आरम्भणशब्दादिभ्यः । आरम्भणशब्दस्तावत् । एकविज्ञानेन सर्वविज्ञाने प्रतिज्ञाय दृष्टान्तापेक्षायामुच्यते 'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं

विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति। एतदुक्तं भवति। एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं घटशरावोदञ्चनादिकं मृदात्मकत्वाविशेषाद् विज्ञातं भवेत्। यतो वाचारम्भणं विकारो नामधेयम्। वाचैव केवलमस्तीत्यारभ्यते विकारः 'घटः', 'शरावः', 'उदञ्चनं च' इति। न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति। नामधेयमात्रं ह्येतत् अनृतम्, मृत्तिकेत्येव सत्यमिति। एष ब्रह्मणो दृष्टान्त आम्नातः। तत्र श्रुताद् वाचारम्भणशब्दाद् दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण कार्यजातस्याभाव इति गम्यते। पुनश्च तेजोऽबन्नानां ब्रह्मकार्यत्वमुक्त्वा तेजोऽबन्नकार्याणां तेजोऽबन्नव्यतिरेकेणाभावं ब्रवीति 'अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्' इत्यादिना॥ सू. भा. २-१-१४, पा. १९६.

(३) 'आरम्भणशब्दादिभ्यः' इत्यादिशब्दात् 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि'. 'इदं सर्वं यदयमात्मा ... इत्येव-मात्मैकत्वप्रतिपादनपरं वचनजातम् उदाहर्तव्यम्॥
सू. भा. २-१-१४, पा. १९७.

अत्र च कार्यस्य कारणानन्यत्ववचनात्, इदं विवक्षितं यत् सर्वं च कारणं माययैव जायत इत्युच्यते एकात्मताविद्याप्रतिपादनार्थम्; वस्तुतस्तु कार्यं नाम नास्त्येव स्वेन रूपेण, कारणे एव त्वविद्यया अध्यस्तं तत्—इति। तथा ह्याह भाष्यकृत् —

(४) तस्मात्, यथा घटकरकाद्याकाशानां महाकाशानन्यत्वम्, यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात् स्वरूपेणानुपाख्यत्वात्, एवम् अस्य भोक्तृभोग्यादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यम्॥ सू. भा. २-१-१४, पा. १९७.

यथोदाहृतानि भाष्यवाक्यानि संप्रदायानुसारीणीत्यत्र द्वे कारिके उदाहरिष्यामः —

(५) सतो हि मायया जन्म युज्यते न तु तत्त्वतः ।
तत्त्वतो जायते यस्य जातं तस्य हि जायते ॥ ३-२७.
न कश्चिज्जायते जीवः संभवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥ ३-४८.

(६) उपलम्भात् समाचारादस्तिवस्तुत्ववादिनाम् ।
जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ॥ ४-४२.

३२. **ब्रह्मणः सृष्टौ जीवरूपेण प्रवेशः** – यथैव सृष्टिः, तथैव जीवरूपेण प्रवेशोऽपि श्रुतिभूच्यमानं न प्रवेशस्य याथार्थ्यविवक्षया, किं तर्हि, ब्रह्मण एवाविकृतस्य मायया जीवरूपेण उपलम्भः – इति बोधनेन आत्मैकत्वबुद्ध्यवतारायैवेति गम्यते । प्रविष्टस्य ब्रह्मणा तादात्म्योपदेशात् । अतः –

'तत्सृष्ट्वा तदेवानुप्राविशत्' ॥ तै. २-६,
'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत' ॥ ऐ. १-३-१२,
'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' ॥ छां. ६-३-२

इत्यादयः श्रुतयोऽध्यारोपदृष्ट्या ; 'स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः' (तै. २-८), 'स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमितीऽ' (ऐ. १-३-१३), 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' (छां. ६-८-७) इत्यपवादश्रुतयः । तदाह भाष्यकृत् –

(१) तदेवेदमाकाशादिकारणं कार्यं सृष्ट्वा तदनुप्रविष्टमिव अन्तर्गुहायां बुद्धौ द्रष्टृश्रोतृमन्तृविज्ञातृ-इत्येवं विशेषवदुपलभ्यते । स एव तस्य प्रवेशः ॥ तै. भा. २-६, पा. ३०१.

(२) आकाशादिकार्यमन्नमयान्तं सृष्ट्वा तदेवानुप्रविष्टं विशेषवदिव-उपलभ्यमानं यस्मात्, तस्मात् सर्वकार्यविलक्षणं अदृश्यादिधर्मकमेवा-नन्दम्, तदेवाहमिति विजानीयात्। अनुप्रवेशस्य तदर्थत्वात् ॥

तै. भा. २–१, पा. ३१३.

(३) उपलब्ध्यर्थत्वाच्च सृष्टिप्रवेशस्थित्यप्ययवाक्यानाम् ॥

बृ. भा. १–४–७, पा. ६५८.

(४) भेददर्शनापवादाच्च सृष्ट्यादिवाक्यानाम् आत्मैकत्वदर्शनार्थ-परत्वोपपत्तिः। तस्मात्, कार्यस्थस्य उपलभ्यत्वमेव प्रवेश इत्युपचर्यते ॥

बृ. भा. १–४–७, पा. ६५८, ६५९.

३३. कर्मोपासनाप्रक्रिया – कार्यकरणसंघातमनुप्रविष्टस्येव सतः कल्पितजीवभावमापन्नस्यैव कर्तृत्वं भोक्तृत्वं च प्रमातृत्ववदेवेति स्पष्टम्। देहेन्द्रियमनोधर्माध्यासस्य अविशेषादत्रापि। तत्र क्रियाकर्तृत्व-मध्यारोप्य कर्माणि विदधच्छास्त्रं कर्त्रादिकारकास्तित्वं न विवक्षति, अपवदत्येव तु धर्माधर्मादिसंबन्धमात्मनः 'अन्यत्र धर्मादन्यत्राधर्माद्' (का. १–२–१४) इत्यादिना। एवं ध्यानक्रियाकर्तृत्वमप्यध्यारोप्यैव उपासनानि विदधत् ध्यानकर्तृत्वस्य सत्यत्वेऽपि न तात्पर्यवत्, तत्कर्तृ-त्वस्याप्यपवादादेव 'ध्यायतीव लेलायतीव' (बृ. ४–३–७) इति। तथा ह्याह भाष्यकृत् –

(१) यथाप्राप्तमेव कारकास्तित्वम् उपादाय उपात्तदुरितक्षयार्थं कर्माणि विदधच्छास्त्रं मुमुक्षूणां फलार्थिनां च फलसाधनम्, न कारका-स्तित्वे व्याप्रियते ॥ तै. भा. शीक्षावल्ल्युपसंहारभाष्ये, पा. २७८.

(२) उपासनोपदिष्टेयं तदर्थं मन्दमध्यमदृष्ट्याश्रमाद्यर्थं कर्माणि च, न च 'आत्मा एक एवाद्वितीयः' इति निश्चितोत्तमदृष्ट्यर्थम् ॥

गौ. का. ३–१६, पा. २१५.

(३) तत्र एतैः आत्मानन्यत्वेन अविद्यया परिकल्पितैः क्रियमाणस्य कर्मणः, 'अहमेव कर्ता' इति कर्तारम् आत्मानं केवलं शुद्धं तु यः पश्यत्यविद्वान् । कस्मात् ? वेदान्ताचार्योपदेशन्यायैरकृतबुद्धित्वात्, असंस्कृतबुद्धित्वात् ... दुर्मतिः कुत्सिता विपरीता दुष्टा अजस्रं जननमरणप्रतिपत्तिहेतुभूता मतिः अस्य – इति दुर्मतिः ; स पश्यन्नपि न पश्यति यथा तैमिरिकोऽनेकं चन्द्रम्, यथा वा अभ्रेषु धावत्सु चन्द्रं धावन्तम्, यथा वा वाहने उपविष्टोऽन्येषु धावत्सु, आत्मानं धावन्तम् ॥

गी. भा. १८–१६, पा. २६३.

[ एतैः – चतुर्दशश्लोकोक्तैः अधिष्ठानादिभिः पञ्चभिः ]

३४. **पञ्चकोशविवेकप्रक्रिया** – एवं तैत्तिरीयकोपात्तपञ्चकोशप्रक्रियाप्यध्यारोपापवादप्रक्रियैवेति स्पष्टम् । तत्र हि 'तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः' (तै. २–२), 'अन्योऽन्तर आत्मा मनोमयः' (तै. २–३), 'अन्योऽन्तर आत्मा विज्ञानमयः' (तै. २-४), 'अन्योऽन्तर आत्मा आनन्दमयः'(तै.२-५) इति देहाद्यविद्याकल्पितात्मन उपन्यस्य तत्र तत्र समष्टिबुद्धिं विधायोपासनां विदधाति शास्त्रम् । अन्ते तु आनन्दमयस्यापि पुच्छत्वेन तद्विलक्षणं सर्वान्तरं ब्रह्मोपदिश्य, 'असन्नेव स भवति । असद् ब्रह्मेति वेद चेत्' (तै. २–६) सर्वानप्यध्यारोपितानात्मनोऽतीत्य परमार्थात्मानं प्रत्यस्तमितसर्वविशेषं सर्वविकल्पास्पदत्वेन ब्रह्मैवावधारयति । तं च 'स एकः' इति सर्वत्रैकमेवैकरूपमुपदिशत्, तद्विद्वान् 'एतमानन्दमयमात्मानमुपसंक्रामति' (तै. २–८) इत्यानन्दमयस्यापि परमार्थरूपं ब्रह्म स्वात्मत्वेन ज्ञातवन्तं परमपुरुषार्थभागिनमाह । उक्तं च भाष्यकृता –

(१) तस्मात्, न प्राप्तिः संक्रमणम्, नापि अन्नमयादीनामन्यतम-कर्तृकम्; पारिशेष्यात् अन्नमयाद्यानन्दमयान्तात्मव्यतिरिक्तकर्तृकं ज्ञान-मात्रं च संक्रमणम् उपपद्यते ॥ तै. भा. २-८. पा. ३१०

इति ॥

[ 'आनन्दमयान्तात्मव्यतिरिक्तात्मकर्तृकम्' इति, स्वात्मानमेव सर्वत्रैकं निरुपाधिकं तत्त्वमवगच्छन् ब्रह्मैव इत्यार्थिकमाह ॥ ]

सम्प्रदायविदश्चाहुः –

(२) रसादयो हि ये कोशा व्याख्यातास्तैत्तिरीयके ।
तेषामात्मा परो जीवः खं यथा सम्प्रकाशितः ॥ गौ. का. ३-११

[स एव परमात्मा 'आत्मा ह्याकाशवत' (३-३) इत्यादिभिः श्लोकैरुक्त्या सम्प्रकाशितोऽस्माभिः–इत्यर्थः ॥ ]

३५. ज्योतिष्ट्वप्रक्रिया – एवमेव ज्योतिर्ब्राह्मणे 'किञ्ज्योतिरयं पुरुषः' (बृ. ४-३-२) इति प्रश्नं जनकमुखेनोत्थाप्य श्रुतिर्याज्ञवल्क्य-द्वारेणाध्यारोपापवादप्रक्रियैव तन्निर्णयमाचष्टे । कार्यकरणसङ्घातस्य हि विविधो व्यवहारो दृष्टः, आसनगमनकर्मनिर्वर्तनप्रत्यागमनादिलक्षणः, स किंज्योतिःसाधनः ? किं सङ्घातोऽयं स्वयमेव स्वस्य ज्योतिर्भवतीदृश-व्यापृतौ, उत स्वव्यतिरिक्तज्योतिःसाधनेन कार्यं निर्वर्तयति ?–इत्यभि-प्रायो जनकप्रश्नस्य । याज्ञवल्क्यस्तु सङ्घातव्यतिरिक्तेष्वेव बाह्येष्वादित्य-चन्द्राग्निवाक्षु तादृशज्योतिष्ट्वमध्यारोप्य, तत्तदभावेऽपि सङ्घातप्रवृत्ति-दर्शनात् वस्तुतः किंज्योतिरेव स्यादयं पुरुषः ? – इति जनकेन पृष्टे 'आत्मैवास्य ज्योतिः' (बृ. ४–३–६) इत्यन्ततो निर्णिनाय । अत्रादित्यादिषु ज्योतिष्ट्वाध्यारोपणं न तात्पर्येण, किं तु सङ्घातव्यतिरिक्तेनैव केनचिज्ज्योतिषा भाव्यमिति सम्भावनादार्ढ्यार्थमेव । यथैव प्राणमयादिषु

आत्मत्वाध्यारोपणम् सर्वान्तरमुख्यात्मनिर्धारणोपायत्वेन, एवमेवेहापि कतम आत्मेति । योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः'(बृ.४-३-७) इति सर्वकार्यकरणप्रकाशकस्यात्मनो बाह्यज्योतिर्निरपेक्षस्य स्वयञ्ज्योतिष्ट्वावगमनोपायत्वेनैवाध्यारोप इति निश्चीयते । 'अत्रायं पुरुषः स्वयञ्ज्योतिर्भवति' (बृ. ४-३-९, ४-३-१४) इत्यवधारणात् ॥

यथाह भाष्यकृत् –

जागरिते विषयेन्द्रियसंयोगात्, आदित्यादिज्योतिर्व्यतिकराच्च आत्मनः स्वयञ्ज्योतिष्ट्वं दुर्विवेचनमिति तद्विवेचनाय स्वप्न उपन्यस्तः ॥

सू. भा. ३-२-४, पा. ३४६.

इति ॥

३६. उत्क्रान्तिगत्यागत्यादिरध्यारोपदृष्ट्यैव – एवमेवोत्क्रान्तिगत्यागत्यादिरप्यध्यारोपप्रक्रियामवलम्ब्यैव । तद्यथा – 'यत्रैतत् पुरुष आर्तो मरिष्यन्नाबल्यमेत्य संमोहमेति तमाहुरुदक्रमीच्चित्तं (त्तम् ?) न शृणोति न पश्यति न वाचा वदति न ध्यायत्यथास्मिन् प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैः रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति' (कौ. ५-३)[1] 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' (बृ. ४-४-२) इत्यादिश्रुतिभिरुत्क्रान्तिः । 'ये वै के चास्माँल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे

1. इदं वाक्यम् शाङ्खायनारण्यकम् इति संज्ञया आनन्दाश्रममुद्रितपुस्तकात् उद्धृतम् । तत्र च पञ्चमाध्यायत्वेन परिगणितम् । निर्णयसागरपुस्तके तु अन्यथैव उपनिषद्वाक्यं दृश्यते ॥

गच्छन्ति ' (कौ. ३-२), ' स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति ' (कौ. ३-३) इत्यादिभिर्गतिः, ' तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे ' (बृ. ४-४-६) इत्यादिभिरागतिः – इत्येवम् अध्यारोपदृष्ट्या । एतस्यापवादस्तु 'स ईक्षाञ्चक्रे । कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति । स प्राणमसृजत ' (प्र. ६-३, ४) इति प्राणोपाधिकैवोत्क्रान्तिः न तु स्वतः–इति वचनात्, 'अप्राणम्' (बृ. ३-८-८) इति परमार्थदृष्ट्या सप्राणत्वस्य निषेधाच्चावगम्यते । एवं हि संप्रदायविद आहुः –

(१) मरणे सम्भवे चैव गत्यागमनयोरपि ।
स्थितौ सर्वशरीरेषु चाकाशेनाविलक्षणः ॥ ३-९.

इति । भाष्यं चात्र –

(1) घटाकाशजन्मनाशगमनागमनस्थितिवत् सर्वशरीरेष्वात्मनो जन्ममरणादिः ॥ पा॰ २१२.

इति । तस्मात्, उत्क्रान्त्यादिदर्शनं वैराग्योत्पादनार्थमध्यारोपदृष्ट्यैवेति स्थितम् । अत्र भाष्यम् –

(2) तत्र प्रथमे तावत् पादे पञ्चाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते वैराग्यहेतोः । 'तस्माज्जुगुप्सेत' इति चान्ते श्रवणात् ॥
सू॰ भा. ३-१-१, पा॰ ३२४.

३७. **सामान्यविशेषप्रक्रिया** – एवमात्मानः सामान्यत्वस्वीकारोऽप्यध्यारोपदृष्ट्यैवेति मन्तव्यम् – तत्र श्रुतिः ' स यथा

दुन्दुभेर्हन्यमानस्य न बाह्याञ्शब्दाञ्शक्नुयाद् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः' (बृ. २-४-७) इत्यादि । तत्र भाष्यवचने –

(1) दुन्दुभेस्तु ग्रहणेन दुन्दुभिशब्दसामान्यविशेषत्वेन 'दुन्दुभिशब्दा एते' इति शब्दविशेषा गृहीता भवन्ति । दुन्दुभिशब्दसामान्यव्यतिरेकेणाभावात् तेषाम् । ........ दुन्दुभ्याघातविशिष्टस्य शब्दसामान्यस्य ग्रहणेन तद्गता विशेषा गृहीता भवन्ति । न तु त एव निर्भिद्य ग्रहीतुं शक्यन्ते । विशेषरूपेणाभावात् तेषाम् । तथा प्रज्ञानव्यतिरेकेण स्वप्नजागरितयोर्न कश्चिद् वस्तुविशेषो गृह्यते । तस्मात् प्रज्ञानव्यतिरेकेण अभावो युक्तस्तेषाम् ॥ बृ. भा. २-४-७, पा. ७६२

(2) अनेकदृष्टान्तोपादानम् इह सामान्यबहुत्वख्यापनार्थम् । अनेके हि विलक्षणाः, चेतनाचेतनरूपाः सामान्यविशेषाः । तेषां पारम्पर्यगत्या यथैकस्मिन् महासामान्ये अन्तर्भावः प्रज्ञानघने कथं नाम प्रदर्शयितव्य इति । दुन्दुभिशङ्खवीणाशब्दसामान्यविशेषाणां यथा शब्दत्वेऽन्तर्भावः, एवं स्थितिकाले तावत् सामान्यविशेषाव्यतिरेकात् ब्रह्मैकत्वं शक्यमवगन्तुम् ॥ बृ. भा. २-४-९, पा. ७६२.

अत्र हि ब्रह्मणो महासामान्यत्वं न विवक्षितम् ; अनात्मवस्तुनः सर्वस्यानृतत्वादेव विशेषत्वासंभवे आत्मनस्तत्सामान्यत्वानवक्लृप्तेः । उक्तं हि गीताभाष्ये –

(3) सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते सामानाधिकरण्येन नीलोत्पलवत् 'सन् घटः', 'सन् पटः', 'सन् हस्ती' इत्येवं सर्वत्र । तयोर्बुद्ध्योर्घटादिबुद्धिर्व्यभिचरति । तथा च दर्शितम् ; न तु सद्बुद्धिः । .... एवमात्मानात्मनोः सदसतोरुभयोरपि दृष्ट उपलब्धोऽन्तो निर्णयः, सत् सदेव, असत् असदेवेति ॥ गी. भा. २-१६, पा. १४, १५.

इति । न च निर्विशेषं सामान्यं नामास्तीति सामान्यत्वमध्यारोपदृष्ट्यै-वात्मन इति सिद्धम् ॥

३८. **अवस्थात्रयदृष्टिरप्यध्यारोपेणैव** – एवम् 'जागरितस्थानो बहिःप्रज्ञः .... स्थूलभुग्वैश्वानरः' (मां. ३), 'स्वप्नस्थानोऽन्तःप्रज्ञः .... प्रविविक्तभुक्तैजसः' (मां. ४), 'सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञः' (मां. ५) इत्यात्मनोऽवस्थावत्त्वमपि । तस्याधिदैवतवैश्वानरत्वाद्युपदेशेन परिच्छिन्नत्वनिवारणार्थत्वात् । 'नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्' (मां. ७) इत्यादिना सर्वावस्थासंबन्धापवादेन निर्विशेषत्वदर्शनात् । तथा हि भाष्यं द्वादशमन्त्रव्याख्यानावसरे अभिधानाभिधेयरहितपरिशुद्धोङ्कारस्वरूपमात्मानं दर्शयित्वा प्राह –

प्रपञ्चोपशमः शिवोऽद्वैतः संवृत्तः । एवं यथोक्तविज्ञानवता प्रयुक्त ओङ्कारस्त्रिमात्रः, त्रिपाद् आत्मैव । संविशत्यात्मना स्वेनैव स्वं पारमार्थिकमात्मानं य एवं वेद । परमार्थदर्शनाद् ब्रह्मवित् तृतीयं बीजभावं दग्ध्वा आत्मानं प्रविष्ट इति न पुनर्जायते । तुरीयस्य अबीजत्वात् । न हि रज्जुसर्पयोर्विवेके रज्ज्वां प्रविष्टः सर्पः बुद्धिसंस्कारात् पुनः पूर्ववद् विवेकिनां उत्थास्यति ॥ मां. भा. १२, पा. १९४

इति ॥

३९. **बन्धमोक्षादिसर्वव्यवहारोऽप्यध्यारोपदृष्ट्यैव** – किं बहुना ? अस्मिन् किरणे ये ये प्रदर्शिताः प्रक्रियाविशेषाः, अनुक्ताश्चात्र ये ये उपनिषत्सु समुपात्ताः, ते सर्वे अध्यारोपदृष्ट्यैव प्रत्यस्तमितसर्वविशेषं नित्यशुद्धबुद्धमुक्तस्वभावं वस्तु ज्ञापयितुमुपायत्वेनैव कल्पिताः,

न तु वस्तुनि प्रक्रियार्पिता धर्माः कथमपि कञ्चिदपि विशेषमाधातुं शक्नुवन्तीत्येष वेदान्तसिद्धान्तः । योऽयं विज्ञानमय इति संसारबद्ध इत्याभात्यज्ञदृष्ट्या, स एष नित्यनिरस्तसर्वविशेषं ब्रह्मैव – इति ज्ञानमाधातुमेव हि विविधप्रक्रियाङ्गीकारेण सर्ववेदान्तप्रवृत्तिरिति । तथा हि श्रुतिः –

(१) तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः ॥
बृ. २-५-१९.

(२) स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद ॥ बृ. ४-४-२५.

(३) ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि ॥
छां. ६-८-७.

इति च । आह च भाष्यकारो बृहदारण्यकव्याख्यानप्रसङ्गेन –

(1) चतुर्ष्वपि प्रपाठकेष्वेक आत्मा तुल्यो निर्धारितः परं ब्रह्म । उपायविशेषस्तु तस्याधिगमे अन्यश्चान्यश्च । उपेयस्तु स एवात्मा यश्चतुर्थे ‘ अथात आदेशो नेति नेति ’ इति निर्दिष्टः ॥
बृ. भा. ४-५-१५, पा. ९४४.

इति । न च निर्विशेषत्वादविषयत्वाच्च तद्विषयकज्ञानानुपपत्तेः शून्यकल्पत्वम् । स्वयंसिद्धचिद्रूपत्वात्, सर्वस्यात्मत्वाच्च स्वप्रकाशकज्ञानान्तरानपेक्षत्वात् । न च स्वयंसिद्धत्वे ब्रह्मविद्योपदेशानामप्रामाण्यप्रसङ्गः, वेदितुरेव ब्रह्मत्वेन आत्मनि कर्तृकर्मत्वानुपपत्तौ स्वात्मविषयकविद्योत्पत्त्याकाङ्क्षानुपपत्तिश्च–इति शङ्क्यम् । ब्रह्मणो वेदितुरात्मत्वेन स्वयंसिद्धत्वानुभवस्यैव विद्याशब्दव्यपदेश्यत्वात् । अध्यारोपापवादन्यायेन निष्प्रपञ्चमेव

प्रपञ्चय तादृशानुभवाभिव्यञ्जनार्थत्वादेव शास्त्राचार्योपदेशस्य । यदाह भाष्यकारः –

(2) इदं शरीरस्थं यद् गृह्यते, अग्रे प्राक् प्रतिबोधादपि ब्रह्मैवासीत् सर्वं चेदम् । किं तु, अप्रतिबोधात् 'अब्रह्मास्मि, असर्वं च' इति आत्मन्यध्यारोपात् 'कर्ताऽहम्, क्रियावान्, फलानां च भोक्ता सुखी दुःखी, संसारी' इति च अध्यारोपयति । परमार्थतस्तु ब्रह्मैव तद्विलक्षणं सर्वं च । तत् कथञ्चिदाचार्येण दयालुना प्रतिबोधितं 'नासि संसारी' इति, आत्मानमेवावेत् स्वाभाविकम्, अविद्याध्यारोपितसर्वविशेष-वर्जितम् ॥ बृ. भा. १-४-१०, पा. ६७२.

(3) ननु विप्रतिषिद्धं 'न विज्ञातेर्विज्ञातारं विजानीयाः' इति श्रुतेर्विज्ञातुर्विज्ञानम् । न । एवं विज्ञानान्न विप्रतिषेधः । एवं 'दृष्टेर्द्रष्टा' इति विज्ञायत एव । अन्यज्ज्ञानानपेक्षत्वाच्च ॥

बृ. भा. १-४-१०, पा. ६७३.

न चैवं ब्रह्मानुभवानुत्पत्तिप्रसङ्गः, तत्कारणानाकाङ्क्षणादेव–इति शङ्क्यम् । अनुभवात्मकस्यैव सतः, तत्प्रतिपत्तिप्रतिबन्धापगमे सति यदात्मन्येव विश्रमणम् तदाभासबुद्धिजन्म च, तस्यैवानुभववाचोयुक्त्या अभ्युपगमात् । अस्ति ह्यत्र भाष्यवचनम् –

(4) एष व्यावृत्तसर्वसंसारधर्मकोऽनुभवात्मको ब्रह्मसंज्ञकः तत्पदार्थो वेदान्ताभियुक्तानां प्रसिद्धः ॥ सू. भा. ४-१-२, पा. ४६२.

(5) तत्र येषामेतौ पदार्थौ अज्ञानसंशयविपर्ययप्रतिबद्धौ तेषां 'तत्त्वमसि' इत्येतद् वाक्यं स्वार्थे प्रमां नोत्पादयितुं शक्नोति ॥

सू. भा. ४-१-२, पा. ४६२.

(6) तस्मात् सर्वदुःखविनिर्मुक्तैकचैतन्यात्मकोऽहम् इत्येष आत्मानुभवः ॥ सू. भा. ४-१-२, पा. ४६३.

(7) दृशिरेवानुभूयेत स्वेनैवानुभवात्मना ।
तदाभासतया जन्म धियोऽस्यानुभवः स्मृतः ॥
उप. सा. १८-२०५.

[तदाभासतया अनुभवरूपचिद्व्याप्तत्वात् । अस्यानुभवः, आत्मनोऽनुभवः ॥]

एवम्

(४) 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'
बृ. २-४-५.

(५) 'न सुखदुःखे विजिज्ञासीत सुखदुःखयोर्विज्ञातारं विद्यात् .... न मनो विजिज्ञासीत मन्तारं विद्यात्' ॥ कौ. ५-८.

इत्यादिना श्रवणादिसाधनानि आत्मानुभवलक्षणज्ञानार्थमुपदिश्यमानान्यपि अध्यारोपदृष्ट्या विज्ञानात्मपरमात्मभेदमुररीकृत्यैवोपदिश्यन्ते प्रत्यक्प्रवणतासंपादनार्थम् । बन्धमोक्षादिव्यवहाराश्च तथैवाध्यारोपदृष्ट्यैव । यदप्युक्तम् भाष्यकृता –

(8) यो हि बहिर्मुखः प्रवर्तते पुरुषः 'इष्टं मे भूयात्, अनिष्टं मा भूत्' इति, न च तत्रात्यन्तिकं पुरुषार्थं लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसङ्घातप्रवृत्तिगोचराद् विमुखीकृत्य प्रत्यगात्मस्रोतस्तया प्रवर्तयन्ति 'आत्मा वा अरे द्रष्टव्यः' इत्यादीनि ॥
सू. भा. १-१-४, पा. १९.

(9) बुद्ध्याद्युपाधिकृतं तु विशेषमाश्रित्य ब्रह्मैव सन् जीवः कर्ता भोक्ता च इत्युच्यते । तस्य उपाधिकृतं तु विशेषपरित्यागेन स्वरूपं ब्रह्म

दर्शयितुं 'न वाचं विजिज्ञासीत, वक्तारं विद्यात्' इत्यादिना प्रत्यगात्माभिमुखीकरणार्थम् उपदेशो न विरुध्यते ॥

सू. भा. १-१-३१, पा. ६१.

(10) मनननिदिध्यासनयोरपि श्रवणवदवगत्यर्थत्वात् ॥

सू. भा. १-१-४, पा. २३.

(11) परं एवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते। यथा घटकरकाद्युपाधिवशात् अपरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते, तद्वत्। तदपेक्षया च कर्मकर्तृत्वादिभेदव्यवहारो न विरुध्यते प्राक् 'तत्त्वमसि' इत्यात्मैकत्वोपदेशाग्रहणात्। गृहीते तु आत्मैकत्वे बन्धमोक्षादिसर्वव्यवहारपरिसमाप्तिरेव स्यात् ॥

सू. भा. १-२-६, पा. ६७.

तदेवं सर्वेषामपि व्यवहाराणाम् अविद्याकार्यत्वात्, अध्यारोपदृष्ट्या सृष्टिप्रलयादिकम् उपन्यस्य, पुनरपवाददृष्ट्या सर्वमपि निषिध्यते वेदान्तेषु—इत्येषो वेदान्ताभियुक्तसमयः। तदेतत् वेदान्तसंप्रदायविद्भिः श्रीगौडपादाचार्यैरपि संग्रहेणोक्तम् –

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ गौ. का. २-३२.

[भाष्यम् – यदा वितथं द्वैतमात्मैवैकः परमार्थतः सन, तदेदं निष्पन्नं भवति – सर्वोऽयं लौकिको वैदिकश्च व्यवहारोऽविद्याविषय एवेति ........ उत्पत्तिप्रलययोरभावात् बद्धादयो न सन्ति–इत्येषा परमार्थता ॥]

इत्येवं सङ्क्षेपेण प्रदर्शिता श्रीशङ्करभगवत्पादसंमतवेदान्तप्रक्रियासरणिः सामान्यतो विशेषतश्च। यथा त्वेतत्प्रक्रियारहस्यमजानद्भिरन्यथा

अन्यथा विकल्पितो वेदान्तार्थः, हस्तीव जात्यन्धैः, तथा आगामि-किरणेष्वादर्श्यते जिज्ञासूनामुत्पथप्रवृत्तिनिवारणपूर्वकं श्रेयोमार्गे आनयनार्थमिति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरण-परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्र-सरस्वत्याख्येन भिक्षुणा प्रणीते शुद्धशाङ्करप्रक्रियाभास्कराभिधे प्रकरणे **अध्यारोपापवादप्रक्रियाविशेषो नाम पञ्चमः किरणः**

# अशुद्धसंशोधनम्

अ = अधरोत्तरं गणने

| पृष्ठे | पंक्तौ | पठितव्यम् |
| --- | --- | --- |
| ३ | अ. २ | तत्सम्बद्धेषु |
| ७ | अ. ६ | भाष्यभागो |
| ९ | अ. ३ | रूपत्व |
| १० | अ. ९ | प्रमेयत्वाभावः |
| १० | अ. ६ | व्यवच्छिद्यन्ते |
| १७ | ५ | योऽङ्गैः····योऽपि |
| २१ | ८ | कुर्वती |
| २२ | ८ | प्रक्रियाप्रकाश |
| २५ | अ. ४ | कथापि कृपया |
| ३२ | अ. ६ | चोपसंहारात् |
| ३२ | अ. ५ | इति मता |
| ३६ | ८ | [illegible] |
| ४० | अ. ४ | [illegible] |
| ४६ | अ. १ | [illegible] |
| ४७ | अ. ९ | [illegible] |

## शुद्धशाङ्करप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

**ईशकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च** –

( सभाष्याः श्रीसच्चिदानन्देन्द्रसरस्वतीभिष्टिप्पणेनालङ्कृताश्च पृथक् पृथक् प्रकाशिताः ॥ )

**सुगमा** – अध्यासभाष्यस्य नवीनव्याख्या, सच्चिदानन्देन्द्रसरस्वतीभिर्विरचिता –

(वेदान्तप्रक्रियामार्गदर्शिनीयं व्याख्या । व्याख्यानभाष्यान्तरप्रस्थानविमर्शन-सहिता ॥ )

**माण्डूक्यरहस्यविवृतिः** – उपनिषदो गौडपादीयकारिकाणां च अभिनवा व्याख्या –

( कारिकारहस्यमुद्धाटितम्, विविधशङ्कापनोदनं च कृतं श्रीसच्चिदानन्देन्द्र-सरस्वतीभिरत्र ॥ )

**आनन्दवल्ली भृगुवल्ली च** – सभाष्या, सच्चिदानन्देन्द्रसरस्वतीकृतभाष्यार्थ-विमर्शिनीसहिता –

(भाष्यग्रन्थग्रन्थयो भिन्नाः, परमतशङ्काश्च परिहृता श्रीचरणैरत्र ॥)

**वेदान्तप्रक्रियाप्रत्यभिज्ञा** – श्रीसच्चिदानन्देन्द्रसरस्वतीभिर्विरचितो निबन्धः –

(अध्यारोपापवादप्रक्रियैवैका सर्वत्र वेदान्तेषु परमार्थतत्त्वसमर्पणाय समादृतेति प्रतिष्ठापितमत्र । अतिप्राचीनकालादारभ्य सर्वज्ञात्ममुनिसमयपर्यन्तवृत्तवेदान्त-विचारेतिहासोऽपि प्रक्रियावैभवप्रदर्शनार्थं संगृहीतोऽत्र । शङ्करभाष्याभिप्रायं जिघृक्षूणामत्यन्तोपकारी ग्रन्थः ॥ )

**शुद्धशाङ्करप्रक्रियाभास्करः** – तत्र आद्यकिरणद्वयात्मकः प्रथमो भागः –

(वेदान्तसिद्धान्तनिर्णयः, शाङ्करसम्प्रदायनिर्णयश्च कृतोऽत्र ॥ )

सविवरणक्रेयपुस्तकपट्टिकाप्राप्तिस्थानम्

**अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.**

(हासनजिल्ला, मैसूरुसंस्थानम्, दक्षिणरेल्वे.)